नं प्रतिभाप्रतं न्नाऽऽस्यादिति तत्स्वरूपेत्युक्तं ब्रह्मात्मैक्यं नित्यस्यानंदरूपत्वप्रतिपादित
मथस्तात्।। विचारजन्यज्ञानस्यो कोऽभय विधिप्रयोजनमित्यत्र कर्मेणश्रुतीप्रमाणयति
। तरतीत्यादिना। आत्मवित् आत्मा ब्रह्मात्मसाक्षात्कारवान् शोकोपलक्षितं संसारम्
त्वज्ञानं तरति अतिक्रामति यः कश्चिद् ब्रह्म परमात्मानं प्रत्यग्रूपं वेद साक्षात्करोति स ब्र
ह्मैव भवति तद्रूप एव भवतीत्यर्थः। नन्वविद्यानिवृत्तेर्विद्यासाध्यत्वेन प्रयोजनत्वेपि
कथं स्वरूपानंदस्य तथात्वं तस्य नित्यप्राप्तत्वेन विद्यासाध्यत्वाभावादिति चेत्। सत्यं नित्य

तरति शोकमात्मविदिति श्रुतेः ब्रह्मवेद ब्रह्मैव भवतीति श्रुतेः। अथ यमधिकारी।।
जन्ममरणादिसंसारानलसंतप्तो दीप्तशिरा जलराशिमिवोपहारपाणिः।
श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपसृत्य तमनुसरति।

प्राप्तमप्यानंदात्मब्रह्मरूपमविद्यावस्थायां विस्मृतकंठगतचामीकरवदनवाप्त
मिव भवति विद्ययात्वविद्यानिवृत्तौ विज्ञातचामीकरवद् अभिव्यक्तिमापद्यमानमवा
प्तमिव व्यपदिश्यत इति न कश्चिदनुपपत्तिरिति भावः। एवं साधनचतुष्टयसंपन्नस्या
धिकारिणो विज्ञानविधिं वक्ष्यन्नादौ तत् आत्मसाधने जिज्ञासायां गुरूपसत्तिं दर्शयति। अ
यमधिकारीति। मरणशीलत्वादिः यद्वा जन्मादिरेवाग्निः संसारानलसंतप्तो गुरुमुपसृत्य त

तत्रैवेति। उपक्रमोपसंहारादिभिः लिंगैर्वेदांततात्पर्यनिरूपणात् प्रत्यक्स्वरूपब्रह्म
ण्येव तात्पर्यदर्शनात् प्रधानादिषु तदर्शनाच्च वेदांतविषयो न प्रधानादिरित्य
र्थः। तथाच स्मृतिस्मृती भगवतः सर्वे वेदा यत्पदमामनंति। वेदैश्च सर्वैरहमेव वेद्य इति च
। तृतीयमनुबंधमाह। संबंधस्त्विति। तदैक्यं प्रत्यग्ब्रह्मणोरैक्यं तच्च तत्प्रमेयं चेति तथा
तस्येति विग्रहः। ननु कथं यथोक्तप्रमेयस्योपनिषत्प्रमाणबोध्यत्वं निर्धर्मके तस्मिन्
शब्दशक्तियोग्यत्वायोगादिति चेन्न। को भावः शब्दादिहीनस्य वाच्यत्वानुपपत्तिरिति चे
तत्रैव वेदांतानां तात्पर्यात्। संबंधस्तु तदैक्यप्रमेयस्य तत्प्रतिपादकोपनिषत्प्रमाणस्य
च बोध्यबोधकभावलक्षणः। प्रयोजनं तु तदैक्यप्रमेयगताज्ञाननिवृत्तिः स्वस्वरूपानंदावा
त। न। अनुक्तोपालंभात्। असंगस्य लक्ष्यत्वानुपपत्तिरिति चेत्। यथा लक्षणावृत्त्याश्रय
णेन ब्रह्मात्मैक्यप्रतिबोधस्तथोत्तरत्र वक्ष्यामः। चरममनुबंधमाह। प्रयोजनं त्विति
। तदैक्यप्रमेयशब्दः पूर्ववत् अज्ञानं वक्ष्यमाणलक्षणं तस्य निवृत्तिः प्रयोजनमित्येता
वत्युक्ते समस्तदुःखोन्मूलनलक्षणं वैशेषिकाभिमतं प्रयोजनमभ्युपगतं प्रतिक्षायात
न्माभूदिति विशेषणांतरोपादानं। अज्ञाननिवृत्तिरानंदावाप्तिश्च प्रयोजनमित्युक्ते नित्य
निरतिशयसुख [illegible] प्रयोजनमिति माध्वाभिमतप्रयोज

एतच्चोपलक्षणं ... इत्यादि ... दिशब्दार्थः॥ अध्या
रोपं सदृष्टान्तं लक्षयति। असर्पेति। ननु कथमवस्तुनो निरात्मकस्यारोपो यावता क्वचिद्दृष्टपू
र्वस्य सत एव क्वचिदारोपो दृष्टः। उक्तं च भट्टपादैः। अत्यन्तस्यैते रजतपुष्पत्वमसत्कथमवस्तु
नि प्रज्ञातगुणस्य ताकमध्यारोपितवानवेति। उच्यते संस्कारजन्योऽपि भ्रमस्तल्लिङ्गे पूर्वप्र
तीतिमात्रमपेक्षते न पुनः पूर्वप्रतीतस्य परमार्थसत्त्वमपि व्यतिरेकाभावात्। संशयविपर्य
ययोरपि संस्कारकार्यस्मृतिदर्शनात्। तथा हि लोकेऽनुभवः शिल्पवल्मीककूटे मम पुरा स्था
णुः पुरुषो वेति संदेह आसीत् अस्मिन्शुक्तिशकले रजतमिति भ्रमः आसीदित्यादि। न च संशय

असर्पभूतायां रज्जौ सर्पारोपवद्वस्तुन्यवस्त्वारोपोऽध्यारोपः। वस्तु सच्चिदानन्दाद्वयं
ब्रह्म अज्ञानादिसकलजडसमूहोऽवस्तु॥

विपर्ययोरेवैयं स्मृतिर्न तद्दर्शयोरिति वाच्यं। अर्थशून्ययोस्तयोः स्मृतिविषयत्वानुपपत्तेः त
स्मान्निरूपाख्यविलक्षणस्य खपुष्पादिप्रसंगानवकाशात् उक्तं वस्तुनि परमार्थसति अवस्तु
नो निर्वचनीयस्यारोप इत्यर्थः। वस्त्ववस्तुनी क्रमेण लक्षयति। वस्त्वित्यादिना। ननु ब्रह्मण
एव वस्तुत्वे जीवस्य शुक्त्यादेश्चावस्तुत्वात्कर्तृत्वाद्यध्यारोपे चाव्याप्तिः स्यादिति चेन्न। ब्रह्म
त्वेव जीवस्यापि कल्पितत्वात्कर्तृत्वादेश्च सोपाधिकभ्रमतया पाध्यनुरक्ते ब्रह्मण्येवाध्यारोप
अन्तःकरणा२ त् शुक्त्यादेरपि रजताद्यधिष्ठानचैतन्यावच्छेदकत्वेनाधिष्ठानत्वमुपपद्यते न पुनस्तस्ये १७
वाधिष्ठानत्वं। अज्ञानादि ... तोपाधिकत्वं। न च ... रजतत्वसत्तिज उक्तात्
पूर्वभ्रमदृष्टस्योत्तरोत्तरारोपोपपत्ते भ्रमप्रवाहस्याज्ञानादित्वेनान्योन्याश्रयानवकाशः

मनुसरतीत्यन्वयः। उपसरणं समीपगमनं। अनुसरणमनुवृत्तिरिति भेदः। अत्युद्विग्न
स्यापि सत्त्वेन नश्यतीति कस्यचिद् भ्रमो मा भूदित्याह। प्रदीप्तेति। निदाघमध्याह्नार्कमरीचि
संव्याप्तत्वात् प्रदीप्तशिराः शिशिरतरमधुरजलपरिपूर्णं महाह्रदं जलराशिः रिक्त
पाणिर्न सेवेत राजानं देवतां गुरुमिति वचनमाश्रित्योपहारपाणिरिति। उपहार उपायनं पा
णौ यस्य सः श्रोत्रियं ब्रह्मनिष्ठमिति गुरोर्विशेषणे। श्रोत्रियत्वं वेदवेदाङ्गपारगत्वं वेदा
र्थपारगत्वं वा पृथक्त्वेनोपयोगात्। श्रोत्रियस्य चाकामहतत्वावृजिनत्वयोरप्युपलक्ष
णार्थं यथा श्रोत्रियोऽवृजिनोऽकामहतश्च इति श्रुतेः। अकामहतत्वं आब्रह्मलोका
न्तादर्वाचीने ध्यानं देहेषु निस्पृहत्वं अवृजिनत्वं यथोक्तकारित्व यानि व्याप्तत्वं। ब्रह्मनि
ष्ठमित्यादिणः श्रोत्रियं ब्रह्मनिष्ठमित्यादिश्रुतेः। स परमकृपयाऽध्यारोपापवादन्या
येन तमुपदिशति। तस्मै स विद्वानुपपन्नाय आत्मतत्त्वं प्राहेत्यादि श्रुतेः॥
एतत्त्वमेवोपनिषद्ब्रह्मात्मविज्ञानपरिदर्शनमित्यर्थः। उक्तविधिना यथोक्तगुरूपसर्पणं विद्या
र्थिनाऽवश्यं कर्त्तव्यमित्यत्र प्रमाणमाह। समिदिति। समित्कुशादिगुरोरनुरूपोपायनमात्रोपलक्ष
णपरः आदिशब्दात् आचार्यवान् पुरुषो वेद आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापदित्यादि
श्रुत्यंतरसंग्रहः। शिष्योपसत्त्यनंतरं गुरोरुपदेशक्रमं दर्शयति। स परमेति। सः गुरुः परमकृप
याश्रयन्नजनलेशदर्शनजातकरुणातत्प्रतिप्रकाशनप्रवृत्तिशीलतद्वक्रममभिवदन्नेः एतदेवद्वि
दयालुलक्षणं यादृशेनैव जनतुद्विग्नेन [illegible]। उत्तमाधिकारिकां श्रुतिं पठति। तस्मा इति। तस्मै

रेकात्। नाप्य... [illegible] ...स्यापि ज्ञात्मनो ज्ञानसंबंधस्य ज्ञानाधीन
त्वात्तस्याप्यज्ञानात्मत्वोपपत्तेः अज्ञानेन योल्लेख्यं बुद्धिभीवरतिनलक्षणस्येति व्याप्तिः अप्रा
प्तसंभवयोस्तु पक्षे वनास्ति ज्ञानेनाज्ञानबाधस्य प्रसिद्धत्वात्। नन्वेवं ज्ञाने ज्ञानप्राग
भावत्वाति व्याप्तिः एवं ज्ञानस्य ज्ञानापनोद्यत्वनियमाभावादिष्टादिवृत्तं तरोत्यस्यापि तद
पनोदर्शनात्। इदं च नियमेन ज्ञानापनोद्यस्याज्ञानत्वाभ्युपगमात्। प्रागभावस्य च प्र
तियोग्युत्पत्तिमात्रविरोधिनस्तदपनोद्यत्वाभावात् न ह्यनुत्पन्नः प्रतियोगी कस्यचिद
पनोदकः संभवति। अज्ञानत्वेन यो रतिव्याप्तिः। नन्वज्ञानस्यापि ज्ञानोत्पत्त्यनन्तरीयकतया
विनाशाभ्युपगमात् कथं ज्ञानापनोद्यत्वमिति चेन्न। ज्ञानोत्पत्त्यनन्तरविलंबाभावाभि
प्रायेण ज्ञानानाशस्य ज्ञानोत्पत्त्यनन्तरीयकतावचोयुक्ते स्वरूपेण भावाभावयोस्तु ज्ञा
नमात्रसपिस्मृदभावानुपपत्तेरित्यस्तिप्रागभावाद्वैषम्यमज्ञानस्येति। तदसम्भ्रामनिवा
त्यमित्यपरं लक्षणं। अत्रापि एवं वदेवाति व्याप्त्यादिपरिहारो द्रष्टव्यः। नेदमसंभवि अज्ञानस्य
सत्वे चिदात्मवद्बाधाभावप्रसंगात् असत्वे च वंध्यासुतादिवदपरोक्षप्रतिभासानुपपत्तेः।
बाधप्रतीत्योश्चाज्ञाने प्रसिद्धत्वात् युक्तं तस्यानिर्वचनीयत्वं सदसत्त्वपक्षयोरुक्तदूषणमुप
मिथ्याज्ञानस्य जनकसंस्कारे जीव्यमिथ्याज्ञानसंस्कारः ज्ञानसमसत्ताकारणं शक्तित्वेनाभ्युपेतमिति मतदूषणनिरसनीयं। मिथ्या
२ ज्ञानमात्मगुणः ज्ञान... [illegible] ...लक्षण... [illegible] ...गुणत्वादि तस्मुक्तं हेत्वा अ

चिन्मात्रनिष्ठत्वाच्चिन्मात्रविषयत्वाच्चाज्ञानस्य तदुक्तं यस्याज्ञानं भ्रमस्तस्य भ्रांतः सम्यक्
वेत्ति सः जडं न विद्याद्वेद्यत्वान्नातोऽज्ञानं जडाश्रयमिति ततश्च सत्यस्य वस्तुनो मिथ्यावस्तु
संभेदावभासोऽध्यारोप इत्युक्तं भवति। एतेन चिज्जडयोः परस्परतादात्म्याध्यासेऽन्यतमेव
जगतस्तत्त्वं स्यादध्यस्तस्य मिथ्यात्वादिति केषांचिच्चोद्यं निरस्तं भ्रमकालपरिस्फुरद्रूपस्य
मिथ्यात्वेऽप्यपरिस्फुरतोंऽशान्तरस्य विद्यमानत्वात्। तदुक्तमभियुक्तैः अध्यस्तमेव हि प
रिस्फुरति भ्रमेषु नान्यत्कथंचन परिस्फुरति भ्रमेषु रज्जुत्वशुक्तिशकलत्वमरुद्दीतित्व
चंद्रैकताप्रभृतिकानुपलंभनेनेति। किंचान्न तद्द्वयमिदमध्यासितव्यमिदं स्याच्चेत्तदाभव
अज्ञानं तु सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किंचिदिति वदं
ति वयमिदं त्वदीयं सत्यान्तात्मकमिदं मिथुनं मिथश्चेदध्यस्यते किमिति स्यादन्यकथाप्र
संगः इति च तस्मादयुक्तमुक्तं वस्तुसच्चिदानंदाद्वयं ब्रह्म तस्मिन्नज्ञानतत्कार्याखिलजडसमू
हस्यावस्तुनोऽध्यारोप इति। अज्ञानं लक्षयति। अज्ञानं त्विति। तु शब्दो मतान्तरेभ्यो वैशि
ष्ट्यद्योतनार्थः। तमेव विशेषं दर्शयति। सदसद्भ्यामित्यादिना। ज्ञानविरोध्यज्ञानमित्युक्तेऽज्ञा
नप्रागभावेऽप्रसंगं व्युदस्यति। भावरूपमिति। उत्तरज्ञानविरोधिपूर्वज्ञानव्युदासाय सदसद्भ्याम
निर्वचनीयमिति। मिथ्याज्ञानव्युदासाय। त्रिगुणात्मकमिति। यद्वाज्ञानविरोधित्वं ज्ञानापनोद्यत्वं त
देवाज्ञानत्वमित्यज्ञानता [illegible] यद्ग्रंथेऽतिव्याप्तिस्तस्याज्ञानोपादानकत्वेनाचि

ज्ञाना

१२

सामान्यबुद्धेर्विशेषाभावे ... [illegible] ... तोऽस्तु प्रसंगात्। न चात्र घटवत्यपि भूतले घटसामा
न्यनिषेधप्रसंगः सुषुप्त्यभावप्रसंगश्च स्यात्। तस्मात् ज्ञानसामान्याभावो दुरुक्त इत्युल्लिख्येत इ
तिवाच्यं। तत्र चाभावज्ञानस्य धर्मिप्रतियोगिज्ञानसापेक्षस्यात्मनि धर्मिणि ज्ञाने च प्रतियोगिनि
विज्ञायमाने तस्मिन्नेवात्मनि कथं ज्ञानाभावग्रहः अभावप्रतियोगिनो ज्ञानस्य तत्रैव वर्तमानत्वा
त् तयोरविज्ञायमानयोरपि कथं तत्राभावग्रहः कारणाभावात्। सर्वप्रमाणापदेशेऽप्ययं न्या
य उद्भावनीयः न त्वनुपपन्नोऽस्तु सामान्यबुद्धेरपि विशेषालम्बनत्वकल्पने यथा घटवत्यपि
भूतले घटो नास्तीति बुद्धेर्विवक्षितघटाभावविषयत्वं तद्वदिहापि सामान्याभावस्य यत्किंचित्प्र
दा॰ तियोगिसत्वविरोधात्मनि विज्ञायमाने तस्मिन्ननुपपत्तेर्न किंचिज्ज्ञानामीति बुद्धेर्ज्ञानविशेषाभा
वविषयत्वं कल्प्यत इति चेत् न अत्र यदेवानुपपत्त्यभावात् इतरविषयत्वस्यैव कल्पनीयत्वात्
न हि सकलोद्भासमानं कंचिदपि न जानामीत्यनुभवे किंचिद्विषयान्तरमवशिष्यते यज्ज्ञानाभाववि
षयत्वमस्य कल्प्येत यथा हि भूतले न कोऽपि घटोऽस्तीति प्रत्यये घटविशेषस्यानवशेषस्तद्वत्
। न च प्रसिद्धाभावात् इतरकल्पनादूरं प्रसिद्धस्याभावस्यैव यथाकथंचिदप्यज्ञानबुद्धिविषयत्वकल्प
नमिति चेत् न अस्य तमःप्रसिद्धस्याभावात् ... वात्मगतस्य स्वगुणानिग्रहाभावात् प्रकृतिस्थितिच स्मृति
वाक्ययोरिक्षणावत्वे नोत्पद्यमानज्ञा ... दुपादानेन ... प्रसिद्धत्वात् तस्मान्नाभावो ज्ञानं किंतु भावान्त
रमेवेति। न तु भावत्वमप्यज्ञानस्यानुपपन्नमनादित्वस्य भावस्य पत्वैचित्र्यालवदनिवृत्तिप्रसंगा

ज्ञानकार्ये प्रतीतेर्वान्ते [illegible]त्वात्त[illegible]कृतिमु[illegible]शिज्ञाः[illegible]दजेन शेषितं रूपं तेजमस्तद्रूपं यत्को
त्सं तदपां यत्कृत्स्नं तदन्नस्येति श्रुतेः। तथा च कार्यगतात्रैरूप्यात् कारणमप्यज्ञानमव्याकृतात्मकं त्रिरू
पेण त्रिगुणात्मकमिति यावत्। तथा च न्यायः ज्योतिरुपक्रमा तु तथा ह्यधीयत एक इति। यद्वा रजःस
त्वतमोत्वलक्षणास्त्रयो गुणास्तद्युक्तमज्ञानं त्रिगुणात्मकं गुणगुणिनोर[illegible]भेदविवक्षया त्रिगुणात्म
कमित्युक्तं। तथा च गुणस्य गुणवत्त्वानुपपत्तेर्न मिथ्याज्ञानमज्ञानमित्यर्थः। ज्ञानाभावो ज्ञान
मिति मतं निरस्यति। भावरूपमिति। अयमर्थः अभावप्रतियोगि यत् ज्ञानं तत्किं साक्षिचैतन्यं स्यात्
साक्षी चेतत्यादि श्रुतेस्तस्यापि ज्ञानत्वप्रसिद्धेः किं वान्तःकरणवृत्तिः विज्ञानेन वा ऋग्वेदं विजानाती
ति विज्ञानशब्देन बुद्धेः श्रवणात् अथवात्मगुणः तथात्वेन च ज्ञानस्य वैशेषिकतन्त्रे प्रसिद्धत्वात्।
तत्राद्ये ज्ञानाभावप्रतियोगीतस्य नित्यत्वात् द्वितीये ज्ञानशब्दस्यौपचारिकत्वेन तदभावस्यमुख्यतोऽज्ञान
त्वायोगात् येन वा पश्यतीत्यादिरथ प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोक इत्यत्र तेन प्रज्ञाशब्द
वाच्यप्रत्यक्चैतन्याप्रभेदवत्त्वश्रुत्यादिद्वारकबुद्धिपरिणामस्य संकीर्तनात् सांख्यपक्षमा
श्रित्यानौपचारिकत्वे स्वीक्रियमाणेऽपि न तस्याभावोऽज्ञानं तस्याभावशब्देन वृत्त्युपादानबुद्धिस्वरू न
पावस्थानमात्रस्याभिलापात् अतः परिशेषात् तृतीयं परिशिष्यते तन्नेदं वक्तव्यं ज्ञानविशेषाभाव
एवाज्ञानं ज्ञानसामान्याभावो वेति नाहमस्मि [illegible] न किंचिज्ज्ञानामीत्यनुल्लिखितविषयविशेषसा
पेक्षज्ञानस्यानु[illegible]स्यापि[illegible] कल्प्यत इति वाच्यं। विनानुपपत्तिसा

देवस्य स्वयंप्रकाशस्यात्मनः शक्तिं शक्तिवत्परतंत्रां स्वगुणैः श्रुत्युक्तादिभिः सत्त्वादिभिर्वा निगूढामा
त्तिं गितां ते ध्यानयोगानुगता अपश्यन्निति संबंधः। अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंत
वः नाहं प्रकाशः सर्वस्य योगमायासमावृत इत्यादिस्मृतिः प्रत्यगात्मचैतन्यस्वरूपस्य ब्रह्म
णो नित्यप्राप्तत्वेन स्वप्रकाशत्वेन चास्ति प्रकाशत इति व्यवहारपुष्कलकारणसत्ति नास्ति
न प्रकाशत इति तद्विपरीतव्यवहारस्यात्मन्यावरणमंतरेणानुपपत्तिः श्रोतव्य इत्यादिना
आत्मयाथात्म्यज्ञानाय श्रवणादिविधानानुपपत्तिश्चेत्यर्थापत्तिरूपं चकारेण समुच्ची
यते। नन्वज्ञोऽस्मि कास्मिंह्रो मायाभिरित्यादिश्रुतिभ्य एकत्वानेकत्वयोरज्ञाने विप्रतिपत्तौ कः
देवात्मशक्तिं स्वगुणैर्निगूढामित्यादिश्रुतेश्च। इदमज्ञानं समष्टिव्यष्ट्यभिप्रायेणैकमनेकमिति च व्यवह्रियते॥
समष्टिरिति वीतशामामाद। इदमिति। व्यष्टिर्विशेषः समष्टिः सामान्यं व्यवह्रियते श्रुत्यादिष्विति
शेषः। अयं भावः येयदनुरक्तबुद्धिविषयो नियतः स तदात्मकः यथा सदनुरक्तबुद्धिविषयो घ
टः सदात्मको दृष्टः तथा सामान्यानुरक्तबुद्धिविषया विशेषाः सामान्यात्मका इति युक्तं सा
मान्यविशेषयोरैक्यं तद्भेदे गवाश्ववत्सामान्यविशेषभावानुपपत्तेः भेदाभेदौ चैकस्मिन्न
प्रमाणिकौ वस्तुनो द्वैरूप्यानुपपत्तेः अभेदपक्षे तु कल्पितादिवद् कल्पनया सामान्यविशेषभावव्यवहा
रोपपत्तेः समुद्रतरंगादिषु त्वत्तं गजेन्द्रादिबुद्धावुपजातज्ञानस्यैकस्यैव सतः सामान्यविशेष
भावे नैकानेकत्वव्यवहारः श्रोतॄणां विरुध्यत इति॥

मिथ्यायेत्युच्यते किं त्वमादवेत्तद्वाच्यं मिथ्या ... । न च भावाभावयोः परस्परप्रतिषेधेऽन्य
तरविधिनान्तरीयकत्वात्तत्कारं ... तदनुपपत्तिरिति वाच्यं । स्त्रीपुंप्रकृत्योः परस्परप्रतिषेधेऽपि नो
निषेधे तदन्यस्य नपुंसकस्यैव भावाभावान्यस्याज्ञानस्याप्युपपत्तेः । ... तत्र प्रमाणान्तरेणातीपा
प्रकृतिरूपत्वमस्यत इति मतं तत्तीर्णं ... प्रमाणप्रतीतिबाधान्यथानुपपत्तिरिति संतोषव्यं
वस्तुतस्तु नानात्मकस्य मत्यं नमः सुदृढः ज्ञाने सर्वानुपपत्तेरलंकारत्वात् तदुक्तं अविद्याया अवि
द्यात्वमिदमेव हि लक्षणं यत्प्रमाणासहिष्णुत्वमन्यथा वस्तु स्याभवेदिति ... निरात्
वात् सर्वन्यायविरोधिनी सद्वृत्तेन विचारं सा न सोढुं ... दिवाकर ... इति ... त्वम

सुदृमतत्त्वानुभवात् ॥

विद्यायामप्रमाणं न तु दूषणं केऽपि चिद्यमानत्वे विद्यात्वं दर्शनं भेदिति । तस्मात् सत्त्वेनास
त्त्वेन सदसत्त्वेन वा ... निरवयवो भयात्मकेन वा भिन्नाभिन्नो भयरूपत्वेन वा ... निर्व
क्तुमशक्यत्वेनानिर्वचनीयमज्ञानं सविलसितदिबाधपरिकल्पितान्धकारवत्तयत्किंचि
दितिवदंतिवृद्धा इति सिद्धं ॥ इदानीं यथानिरूपितमज्ञानमेव नास्तीति विवदमानं प्रति
बोधयितुं तत्रानुभव ... वस्तुतीप्रमाणयति । सुदृमतत्त्वादिना । अनुभवस्यास्याज्ञानाभावि
षयत्वं प्रतिद्विष्टं निर्विकल्पकघटितप्रतियोगिकस्य ज्ञानसामान्याभावस्य स्वात्मनि प्रत्य
क्षेण ... दोषत्वात् । न तु ... ज्ञानात्मनि ... नायमानेन ... तं शक्यते तस्य ज्ञानविरो

रन्यायः प्रामाणिक इति चेत् न। किं मिथ्याजीवस्य प्रपञ्चादिकारणत्वं ब्रह्मजीवत्वं नास्तीति विवक्षितं
केतत्तर्हि कृतनाशाकृताभ्यागमप्रसङ्गः ... आमयि ... रित्यत्र प्रसङ्गः ... स्यादुत्तरः स्यात् विशेषात्।
किं च सुषुप्त्यादावज्ञानसद्भावे तस्य ब्रह्म ... इति तत्त्व ... संयोगसद्भावे सुखप्राप्तं पुनरनुसन्धानप्रसङ्गः न
तदृश्यादेवाप्रसिद्धेरित्यादिना कल्पितो बन्धमोक्षसंगतिप्रसङ्गश्चेत्यसमञ्जसमेतत्। जीवज्ञान
जीवयोः स्वरूपेणानादित्वात्साक्षात्परपर्याप्तिभावस्य नित्यसिद्धत्वान्नान्योन्याश्रयदुष्टत्वमनत
दपि न। ब्रह्मण्यज्ञानाभावप्रसङ्गात् नाप्यसिद्धप्रसङ्गः सोऽकामयत तदात्मानं स्वयमकुरुतेत्यादि
श्रुतिभिर्ब्रह्मणि जगत्कारणे कामयितृत्वादेरज्ञानकार्यस्य श्रूयमाणत्वात् न च दृष्टिगतपीति
न्धः एवं च समारोपवशाज्जीवगताज्ञानविशेषस्य कामयितृत्वादेस्तद्विषये ब्रह्मणि समारोपः स्क
त्वाकीर्त्यत इति वाच्यं। तथा सति जीवानामेव जगत्सर्गस्थितिलयोपादानत्वात्सर्वं खल्विदं
ब्रह्मेत्यादि ब्रह्मसामानाधिकरण्यं जगतः श्रूयमाणमेकविज्ञानेन सर्वविज्ञानप्रतिज्ञानं च
पीड्येत जीवस्य ब्रह्माभेदात्सर्वमेवोपपद्यत इति न कश्चिद्दोष इति चेत् तर्हि जीवपक्षपातं प
रित्यज्य ब्रह्मण एव जगत्सृष्ट्यादि यथाश्रुतं कर्तृत्वं विना तस्याज्ञानाश्रयत्वं कूटस्थस्य
न कामयितृत्वादीत्युक्तं। तस्य च जीवादिभिन्नस्याज्ञानाश्रयत्वेऽपि तत्रोक्त्यादन्योन्याश्रयः
। ननु ब्रह्मणो जगत्कारणत्वादि तिमीरुक्तमज्ञानं मायाशब्दवाच्यमन्यदेव जीवगतकर्तृत्वा
घनभासकेतुभ्योऽज्ञानेभ्यो [illegible] ॥ जीवादिभिन्नत्वेऽपि ब्रह्मणोऽज्ञानाश्रयत्वसिद्धिरज्ञान
[illegible] ... सिद्धिरितिर

अनंतरं लिंगशरीरं

एतदेव दृष्टान्तैरुपपादयितुमुपक्रमते। तथा हीत्यादिना। पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः पुरः स पक्षी भूत्वा पुरः पुरुष आविशत् रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय इति मन्त्रवर्णानुसारेणात्मा नन्तत्वाद्यावच्छिन्नो ज्ञानतत्त्वाय प्रतिबिम्बितो वा चिदात्मा जीवेश्वरभावं भजत इति मतद्वयमुपरूप्य दृष्टान्तद्वयोपादानमिति सर्वेन वनवृक्षजलाशयजलकीर्तनाभिप्रायो बोद्धव्यः। नानात्वेनेत्यादेरयमर्थः। अज्ञानं किं व्यष्टिसमष्टितज्जीवनिष्ठं नानात्वानित्यत्वमुद्दत्वादिस्वभावविरोधात् न द्वितीयोऽन्योन्याश्रयात् तथा हि अज्ञानमित्युक्ते कस्य किंविषयमित्याश्रयविषययोः सापेक्षतया प्रतीतेर्निराश्रयत्वमस्तीति तर्वादिपदार्थानां समष्ट्यभिप्रायेण वनमिति एकत्वव्यपदेशः यथा वा जलानां समष्ट्यभिप्रायेण जलाशय इति तथा नानात्वेन प्रतिभासमानानां जीवगतानामज्ञानानां समष्ट्यभिप्रायेण तदेकत्वव्यपदेशः॥

प्रतिपत्तुं शक्यं तस्य च जीवाश्रयत्वे जीवभावस्याप्यज्ञानाधीनत्वात्सिद्धे जीवभावे अज्ञानस्याश्रयत्वसिद्धिः तत्सिद्धौ च जीवत्वसिद्धिरिति कथं नान्योन्याश्रयः। नन्वनादित्वादज्ञानजीवभावप्रवाहस्य बीजाङ्कुरवन्नान्योन्याश्रय इति चेन्न। क्रमभाव्यनेकबीजाङ्कुरव्यक्तिवदनेकाज्ञानजीवव्यक्तीनां सत्त्वे प्रमाणाभावात्। ननु सत्तामात्रस्य तदा सम्पन्नो भवति तद्धेदं तर्ह्यव्याकृतमासीदित्यादिश्रुतिभ्यः सुषुप्तिप्रलययोर्जीवस्य परमात्मैकभावापत्तिश्रवणात् पुनः प्रबोधसर्गयोर्जीवभावापत्तेरवगम्यमानत्वात् तदानीं अविभागहेतोः संस्काररूपस्याज्ञानस्यानुवृत्त्यवसानत्वात्क्रमेण बीजाङ्कु

भासंते स्वप्न इवाप्रबोधं जाते तु ब्रह्मात्मसाक्षा[illegible] । अनेनेति । [illegible] त्व दृष्टिरिति [illegible] रूपासक्तो [illegible] नेत्व
स्तु घुप्ताविवेति । इयांस्तु पुनर्विशेषः सुषुप्तावेकस्[illegible] न व्याप्ति [illegible] वेल्लार्थे [illegible] गोरोप्य रज्जुत्वेन [illegible] व्यवहारपूर्व
ते कमुक्तौ तु तस्य ज्ञानेन बाधितत्वात्पुनर्व्यवहाराभा[illegible] सत्वं प्रसंगः [illegible] न ॥ ३ ॥ वनवृक्षयो
जलाशयजलयोर्वा सामान्यविशेषभावो नास्तीति [illegible] स्य तथापि समुदाय
समुदायिनोरेकत्वे दृष्टांततया कीर्तितयोः साम्यात्सर्वांशेन च साम्यस्याविवक्षितत्वान्न कश्चिद्दो
ष इति गमयितव्यं अज्ञानैकत्वव्यपदेशिनीं श्रुतिं पठति । अजामेकामिति । आदिपदात्मायां तु प्र

अजामेकामित्यादिश्रुतेः । इयं समष्टिरुत्कृष्टोपाधितया विशुद्धसत्वप्रधाना । एतदुप
हितं चैतन्यं सर्वज्ञत्वसर्वेश्वरत्वसर्वनियन्तृत्वादिगुणकमव्यक्तमन्तर्यामी जगत्कारणमीश्व
र इति च व्यपदिश्यते ॥

कृतिं विद्यात् । तरत्यविद्यां विततां अदूरात्परतः परः तद्वेदं तर्ह्यव्याकृतमासीत्तमस आसीत्तमसा गूढमित्या
द्येकवचनांतश्रुत्यंतरग्रहः ॥ एकमेवाज्ञानं समष्टिव्यष्टिभेदभिन्नं परिकल्प्य समष्ट्यज्ञानोपधानेन
वृक्षवनं चैतन्यव्यवहारं वक्तुं समष्टिं विशिनष्टि । इयमिति । उत्कृष्टोपाध्यंतरानुरक्ततया प्रतिहत
ज्ञानात्मकस्य चैतन्यस्योपाधितया विशुद्धरजस्तमोभ्यामनभिभूतं सत्वं प्रधानं यस्याः सा तथाविधे
यं समष्टिरित्यर्थः समष्ट्यज्ञानोपहितचैतन्यस्य व्यपदेशभेदं दर्शयति । एतदिति । परमा[illegible] येनोमेग
स्यापि चैतन्यस्याध्यात्मिकसंबंधसंबंधज्ञानद्वारा सर्वावभासकत्वेन सर्वेमयादाविधारकमन्त्ना
यत्वेन स्वदेजीवप्रवर्तकत्वेन च लब्धसर्वज्ञत्वादिगुणकस्य [illegible] मीश्वर इत्यादिव्यपदे

शब्दवाच्यमस्त्विति चेन्न। आभासविशेषयोः स्फुलिङ्ग। [illegible] रेकत्वस्य वृद्धैर्निरूपितत्वात्
। अनिर्वचनीयत्वेसति तत्त्वावभासप्रतिबन्धविपर्ययावभासहेतुत्वस्य लक्षणस्य तुल्यत्वात्। अवि
द्याभेदे च कल्पनागौरवदोषात्। एकाविद्यापक्षेप्यनन्तविक्षेपशक्तिकल्पनया जाग्रत्स्वप्नवद्धर्मो
त्तरणानाभुजगादिव्यवहारव्यवस्थोपपत्तेः। न च तत्रापि कल्पनागौरवं समानं। धर्मिभेदकल्प
नातो धर्मभेदकल्पने लाघवादित्यास्तां विस्तरः। अतस्मिन्मात्रनिष्ठमज्ञानं तस्य जीवत्वस्य वि
भागहेतुत्वं तस्य जगत्स्रष्टृत्वादेर्जीवस्य कर्तृत्वादेश्च हेतुरित्यङ्गीकर्तव्यं। न च चिन्मात्रस्य स्वप्र
काशत्वादज्ञानाश्रयत्वविरोधः। जीवपक्षेपि तुल्यत्वात्। अन्तःकरणपरिणामोपहितस्यैव चै
तन्यस्याज्ञानविरोधित्वात्। न च ज्ञानवदज्ञानस्याप्येकाश्रयविषयत्वानुपपत्तिरावरकत्वेनाप
वरकस्य तमोवत्तदुपपत्तेः। तदुक्तमभियुक्तैः आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव के
वला। पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचर इति। तस्मादेकमज्ञानं चिन्मात्राश्रयविषय
मिति स्थिते जीवावस्थायामेवादमज्ञ इति स्फुरत इतरव्यवहारात्तदपेक्षया जीवगताज्ञानमित्युक्तमिति
। नन्वेवमपि जीवाश्रयावस्थापदास्य विद्यानन्तरमिति प्राचां वचनं योजनीयं। ननु नानात्वेन प्रतिभा
समानानां जीवानामेकाज्ञानोपाधिकत्वे एकमुक्तौ सर्वमुक्तिप्रसङ्ग [illegible] किंवदन्तेयः। एकस्यैव जीवत्वा
वि दितरे प्रातिस्विकविजृम्भितत्वेन ततो नातिरेकात् तर्हि कोऽसौ [illegible] यदृष्टि [illegible] नीवृत [illegible] इति चेत् यः
पश्यति स एवं अहं तु संसारिणमात्मानं [illegible] जीवान् [illegible] इति [illegible] जीवस्त्व
दविद्यपावयमन्ये पश्यन्ति जीवसामग्र [illegible] ज्ञानीत्येवं [illegible] केचनाः कल्पितानां [illegible] सम्भवात्को

एकस्मिन्नज्ञाने व्यष्टिसमष्टिशब्दप्रयोगे निमित्तमाह। अत्रेति। अज्ञानं सप्तम्यर्थः। व्यस्तव्यापित्वेन कार्योपा
धिजीव व्यापित्वावभासेन व्यष्टिताव्यपदेशः। समस्तव्यापित्वेन कारणोपाधिसर्वज्ञत्वाद्विभक्तसर्वव्या
पित्वेन समष्टिताव्यपदेश इत्यर्थः। निकृष्टोपाधितयेति। ज्ञानप्रतिबन्धकारणत्वान्नु जीवो निकृष्टस्तस्यो
पाधिरित्यर्थः। मलिनं रजस्तमोभ्यामभिभूतं सत्त्वं यस्याः सा तथा रजस्तमसोः स्वातन्त्र्येण प्रतिबि
म्बग्राहकत्वायोगादिति भावः। एतदुपहितं व्यष्ट्यज्ञानोपहितं। एकाज्ञानावभासकत्वादज्ञा नैक
देशावभासकत्वादिति यावत्। व्यष्ट्यज्ञानोपहितस्य प्राज्ञशब्दवाच्यत्वे कारणमाह। अस्येति। अ

अत्र व्यस्तसमस्तव्यापित्वेन व्यष्टिसमष्टिताव्यपदेशः। इयं व्यष्टिर्निकृष्टोपाधितया मलिन
सत्त्वप्रधाना। एतदुपहितं चैतन्यमल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञ इत्युच्यते। एकाज्ञानाव
भासकत्वात्। अस्य प्राज्ञत्वमस्पष्टोपाधितयानतिप्रकाशकत्वात्। अस्यापीयमहंकारादिका
रणत्वात्कारणशरीरमानंदप्रचुरत्वादेवहेतोरानंदमयकोशः सर्वोपरमत्वात्सुषुप्तिः।
अत एव स्थूलसूक्ष्मप्रपंचलयस्थानमिति चोच्यते॥

स्य जीवस्याप्यस्पष्टोपाधितया रजस्तमोभ्यामभिभूतसत्त्वप्रधानव्यष्ट्यज्ञानोपाधिकत्वेन हेतुनाऽति
प्रकाशकत्वाभावात्प्राज्ञशब्दवाच्यत्वमित्यर्थः। प्रायेणाज्ञः प्राज्ञ इत्युक्तं भवति एवं तदुपहितस्य व्य
पदेशमुक्त्वोपाधेरप्याह। अस्यापीति। अपिशब्द ईश्वरोपाधिदृष्टान्तार्थः अहंकारादेः सुषुप्त्याद्य
वस्थायां संस्कारावशेषेणावस्थितस्य कारणत्वादित्यर्थः। आनंदप्रचुरत्वादेवेत्येवकारः कोशव
दाच्छादकत्वादिति हेत्वंतरसमुच्चयार्थः। यद्वा आनंदप्रचुरत्वाद्धेतोरेवेति भिन्नक्रमः तस्मिन्यदा

8

...ः लेपै हेतुमाह। सकलेति। सकलाज्ञानं समस्ताज्ञानं अव्यक्तात्मकत्वशब्दो विचारकत्वादेरप्युप
लक्षणार्थः सर्वविक्षेपसंस्कारवत्त्वादज्ञानस्य सत्कार्यवादस्य प्रमाणत्वाच्चाव्याकृताद्यवस्थास्वपि
समस्तज्ञानस्य सर्वत्वमिति द्रष्टव्यं। उक्तव्यपदेशे श्रुतिमाह। यः सर्वज्ञ इति। सर्वज्ञः सामान्य
तः सर्ववित् विशेषत इति भेदः। आदिशब्दात् सदेव सोम्येदमग्र आसीत् ... एष त आत्मान्तर्याम्य
मृतः सद्धतः परमव्यक्तं यतो वा इमानि यः परः स महेश्वर इत्यादिश्रुत्यन्तरग्रहः। उपहितस्य व्यपदे
सकलाज्ञानावभासकत्वात्। यः सर्वज्ञः सर्वविदित्यादिश्रुतेः। अस्यैव समष्टिरखिलकारणत्वा
त्कारणशरीरमानंदप्रचुरत्वात्कोशवदाच्छादकत्वाच्चानंदमयकोशः सर्वोपरमत्वात्सुषुप्तिः
अतएवास्य स्थूलसूक्ष्मप्रपंचलयस्थानमिति चोच्यते। यथा वनस्य व्यष्ट्यभिप्रायेण वृक्षा इत्यनेक
त्वव्यपदेशः यथा जलाशयस्य व्यष्ट्यभिप्रायेण जलानीति तथा अज्ञानस्य व्यष्ट्यभिप्रायेण तद
नेकत्वव्यपदेशः। इन्द्रो मायाभिः पुरुरूप ईयते इत्यादिश्रुतेः॥
...णभेदमुक्त्वोपाध्योरपि तस्य हेतुकमाह। अस्यैवमिति। अज्ञानमिदं शब्दार्थः। आनंदप्रचुरत्वमुपहित
धर्मः आच्छादकत्वमज्ञानधर्मः तदुभयोः विवेकात् कारणमज्ञानमानंदमयकोश इत्यर्थः। सर्वेषा
काशादय उपरमन्ते लीयन्ते इति सर्वोपरमे ... सुषुप्तिः ... यतः सर्वो
परमत्वमत एवेति योजना। स्थूलप्रपंचो विराट् सूक्ष्मप्रपंचो हिरण्यगर्भः। एवं समष्ट्यज्ञानं सामासेन
व्यपदेशान् निरूप्य व्यष्ट्यज्ञानं सदृष्टान्तं निरूपयति। यथेत्यादिना। केवलमनेकत्वव्यप
देशो ज्ञानस्येति तदाह ... प्रसिद्धेति ...

उक्तोपायोऽस्तु तदुपहितयोऽस्य प्राक् सिद्धवत्के नमभेदं विशदयति। अनयोरिति। प्राज्ञेश्वरयोरभेदे स्फुटंति
प्रमाणयति। एवमेवेश्वर इति। आदिपदादृष्टपर्णं जसं प्रसादोक्ता ... रीरात्समुत्थाय परंज्योतिरूपसंप
द्य स्वेन रूपेणाभिनिष्पद्यत इति श्रुत्यंतरं गृह्यः। प्राज्ञेश्वरात्मकस्य चैतन्यस्योपहितत्वेऽनुपहितत्वे चैतन्य
स्मन्यद्वैतत्वं यो [illegible] दुक्तः किं तादृक्तत्वे स्यापातस्वरूपं स्वरूपं दर्शयति। वनेति। आधारभूतावनुपहि
तस्याभासावाकाशस्य सत्त्वायादृदिति यावत्। यथा आकाशस्य वनाश्रयत्वं जलाराशस्य प्रत्येवानाहितदन
अनयोः समष्टिव्यष्ट्योर्वनवृक्षयोरिव जलाशयजलयोरिव वाऽभेदः। एतदुपहितयोरीश्वरप्राज्ञयो
रपि वनवृक्षावच्छिन्नाकाशयोरिव जलाशयजलगतप्रतिबिंबाकाशयोरिव वाऽभेदः एवमेवेश्व
र इत्यादिश्रुतेः वनतदवच्छिन्नाकाशयोर्जलाशयजलगतप्रतिबिंबाकाशयोर्वा आधारानुपहि
हिताकाशवदनयोरज्ञानतदुपहितचैतन्ययोराधारभूतं यदनुपहितं चैतन्यं तत्तुरी
यमित्युच्यते। शिवमद्वैतं चतुर्थं मन्यन्ते इत्यादिश्रुतेः। इदमेव तुरीयं शुद्धचैतन्यमज्ञाना
नादितदुपहितचैतन्याभ्यां तप्तायःपिंडवदविविक्तं सन्महावाक्यस्य वाच्यं विविक्तं सल्लक्ष्य
रेभकलात् तपायवकारामतरेणातयोः स्थित्यनुपपत्तेस्तदाधारत्ववत्त्वनमिति द्रष्टव्यम्। अस्यचै
तन्यस्य तुरीयत्वं वक्ष्यमाणविश्वाद्युपेक्षयेति द्रष्टव्यं। तत्र प्रमाणमाह। शिवमिति। आदिपदात्त्रिषु
धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत्। तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिव इत्यादिश्रुत्यं
तरग्रहः। अध्यारोपेण व्याख्यातं तन्निरूपणप्रकरणार्थः विस्तरेणाभूदिति प्रसंगात्तमाह। इदमेवेति॥

सता सोम्य तदा संपन्नो भवतीत्यादिश्रुतेः सुषुप्तौ प्राज्ञेश्वरसंपत्त्यवगमात् प्राज्ञेश्वरयोरेकत्वं तदव
स्थयोरपि अव्याकृतसुषुप्त्योरेकत्वं सिद्धवत्कृत्य ततोऽस्त तदवस्थासंपन्नं भोगं दर्शयति। तदानीमिति।
तयोरप्यवस्थयोर्जीवावच्छेदकस्याव्यक्तज्ञानस्यैकेनापि रूपेणास्थितत्वादेतावित्यादिद्विवचनेऽपादा
नेऽसत्कीत्ममनैक्यं पुनरस्यानानुपपत्तेः आनंदस्वरूपानंदमनुभवतः आनंदशब्दोऽज्ञानतत्कार्यगोचर
पर्युल्लक्षणापरः। तदानीमखण्डात्मस्वरूपचैतन्ये [illegible] नैवानंदाद्यनुभवेऽभ्युपगम्यमाने स्वरूपस्यानित्यत्वा
त् तज्ज्ञानसंस्काराभावेनावस्थांतरे स्मरणानुपपत्तेस्तदनुकूलमुपाधिविशेषं कल्पयति। अज्ञान

तदानीमेतावीश्वरप्राज्ञौ चैतन्यदीप्ताभिरतिसूक्ष्माभिरज्ञानवृत्तिभिरानंदमनु
भवतः। आनंदभुक् [illegible] चेतोमुखः प्राज्ञ इत्यादिश्रुतेः। सुखमहमस्वाप्सं न किंचि
दवेदिषमित्युत्थितस्य परामर्शोपपत्तेश्च॥

वृत्तिभिरिति। अंतःकरणादेरप्यज्ञानकार्यत्वेन तदात्मकत्वात्तदभिप्रायोऽज्ञानशब्दो मा भूदिति विशिन
ष्टि। सूक्ष्माभिरिति। उक्तेर्व्यपत्यमतिसूक्ष्मत्वं। तासां वृत्तीनां जडत्वात् कथं ताभिरानंदाद्यनुभव इत्यत आ
ह। चैतन्येति। चैतन्यव्याप्ताभिरित्यर्थः। तथा च वृत्तिविनाशानंतरं विशिष्टचैतन्यस्यापि विनाशात् संस्कारजनक
स्मरणमवस्थांतरे संभवतीति भावः॥ तत्र प्रमाणमाह। आनंदभुगिति। चेतोमुखश्चैतन्यदीप्ताज्ञान
वृत्तिप्रधानः आदिशब्दात् सुषुप्तिकाले सकले विलीने [illegible] तमोऽभिभूतः सुखरूपमेतीत्यादिश्रुतेरुपग्रहः
। तत्रैवानुभवमपि प्रमाणयति। सुखमिति। न चात्र सुखपदं दुःखाभावविषयमस्तु निरनुभूतत्वात्
तदनुभवसामग्र्याश्च निरूपयितुमशक्यत्वात्। वस्तुतस्त्वेतदद्वैतस्य परमपुरुषार्थत्वेन तत्साधिकारात्॥

अत्राचार्योक्तं [illegible] इति। आवरणविक्षेपशक्तिद्वयविशिष्टमज्ञानं कूटस्था-
संसर्गाद्व्ययक्ते चैतन्यात्मनो जगत्कारणत्वोपाधिरिति भावः। तदुक्तमभियुक्तैः आकाद्यविक्षिपति सं-
स्फुरदात्मस्वरूपं जीवेश्वरत्वजगताकृतिभिर्मृषैव। अज्ञानमावरणविभ्रमशक्तियोगादात्मत्वमा-
त्रविषयाश्रयतावलेनेति। नन्वेवं विधाज्ञानोपाधिकस्येश्वरचैतन्यस्य यत्कारणत्वं। तत्
तन्निमित्तत्वरूपादुपादानत्वा उभयं वेति जिज्ञासायामाह। शक्तिद्वयवदिति। स्वप्रधानतया-
ईटस्य चैतन्यस्य स्वरूपावभासितया स्वोपाधिप्रधानतयाऽउपाध्युपरक्तसत्तास्फूर्तिस्वरूपतयेति
तदुक्तं विक्षेपशक्तिर्लिङ्गादिब्रह्माण्डान्तं जगत्सृजेदिति स्मृतेः। शक्तिद्वयवदज्ञानो-
पहितं चैतन्यं स्वप्रधानतया निमित्तं स्वोपाधिप्रधानतयोपादानं च भवति। यथा लू-
ता तन्तुकार्यं प्रति स्वप्रधानतया निमित्तं स्वशरीरोपाधिप्रधानतयोपादानं च भवति॥
भेदः। एकस्यैवोभयविधकारणात्मकत्वे दृष्टान्तमाह। यथेति। लूता ऊर्णनाभिः तन्तुरेव कार्यं
तन्तुकार्यं यथा लूता तन्तुनिर्माणप्रसिद्धकार्पासतन्तवः कार्यं यं चादित्सया यमनपेक्ष्यैव तन्त-
ना तानवितानात्मकं च तत्कार्यं जालरूपं सृजति। एवमीश्वरः प्राक्सृष्टेरेकाकी द्वितीयाऽ-
सहाय एव स्वमायाशक्त्या ब्रह्माण्डेन लिङ्गादिब्रह्माण्डान्तं जगत्सृजेदिति भावः। तथा च श्रुतिः
यत्तदद्रेश्यमग्राह्य [illegible] यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सं-
भवन्ति। यथा सतः पुरुषात्केशलोमानि तथाक्षरात्संभवतीह विश्वमिति। न्यायोपि प्रकृतिश्च

॥ एवमेतस्याभिमानिनश्चित्तस्य [illegible] स्वरूपं च निरूप्येदानीं तत्कार्याध्यारोपक्रमेण निरू

पयितुं तस्य [illegible] तावन्निरूपयति। अस्याज्ञानस्येति। तत्रावरणश

क्तिं सदृष्टांतामुपपादयति। आवरणेति। [illegible] ज्ञानस्य [illegible] तत्त्वाभ्यामनिर्वाच्यत्वात्स्वप

रिच्छिन्नत्वेन [illegible] तदाशंक्याह [illegible] । बुद्धि

पिधायकतयेत्यत्र बुद्धिशब्देन तदनुरक्तचैतन्यं लक्ष्यते बुद्धेरज्ञानकार्यत्वेन तदावृतत्वानु

अस्याज्ञानस्यावरणविक्षेपनामकमस्ति शक्तिद्वयं। आवर

णशक्तिस्तावत्। अल्पोपि मेघोनेकयोजनमायतमादित्यमंडलमवलोकयितृनयप

थपिधायकतया यथाच्छादयतीव तथाज्ञानं परिच्छिन्नमपि यया शक्त्या आत्मानमप

रिच्छिन्नमसंसारिणमवलोकयितृबुद्धिपिधायकतयाच्छादयतीव तादृशं सामर्थ्यं

। तदुक्तं घनच्छन्नदृष्टिर्घनच्छन्नमर्कं यथा मन्यते निःप्रभं चातिमूढः तथा बद्धवद्भा

ति यो मूढदृष्टेः स नित्योपलब्धिस्वरूपोहमात्मा॥ अनयावृतस्यात्मनः कर्तृत्वभोक्तृ

त्वसुखित्वदुःखित्वादिसंभावनापि भवति। यथा स्वाज्ञानेनावृतायां रज्जौ सर्पत्वसंभावना।

विक्षेपशक्तिस्तु यथा रज्ज्वज्ञानं स्वावृतरज्जौ स्वशक्त्या सर्पादिकमुद्भावयति एवमज्ञानम

पि स्वावृतात्मनि यया शक्त्या आकाशादिप्रपंचमुद्भावयति तादृशं सामर्थ्यं॥

पयनैः। [illegible] इत्यादिना। उक्तामावरणशक्तिं तत्कौ

दिवसेत्यादावास्म। सेतूपाकाशस्यन्यूनधारेमाणान्वत्त्ववणोऽप्रतीतेनतं प्रतितस्योपाधित्वं। ना
पि विरुद्धः साध्यविपर्ययव्याप्तेः। नापि साधारणानैकांतिको विपक्षाप्रवेशात्। नाप्यसाधार
णः सपक्षगामित्वात्। नापि कालातीतो बाधकप्रमाणनिरूपणात्। न चोक्तानुमानं बाधकमिति
वाच्यं। तस्य नरशिरःकपालस्पृष्टतानुमानवदागमबाधितविषयत्वस्योक्तत्वात्। न च स्कृते
राकाशाभिव्यक्तिमात्रार्थत्वान्नोत्पत्त्यपेक्षेति वाच्यं। सिद्धे चानुमानस्याबाधितविषयत्वेन प्रामा
ण्यपक्षे तेरन्यार्थत्वसिद्धिस्तत्सिद्धावितरसिद्धिरितीतरेतराश्रयात्। किंच तस्माद्वा एतस्मादा
त्मन आकाशः संभूत इति सकर्तृकतः संभूतशब्द आकाशे सादित्वं बद्धमानो गौणः स एव वा
य्वादिवदनुपज्यमानो मुख्य इति मंदादिदं व्याख्यानकौशलं तार्किकशिशोः। नापि संदिग्धानै
कांतिकता विपक्षाद्व्यावृत्तेः स्फुटत्वात्। नापि प्रकरणसमानतात्वदनुमानस्य दुर्बलत्वेनोभ
योः समानबलत्वाभावात्। निरवयवद्रव्यत्वस्य विनश्यदवस्थापन्नेपटे व्यभिचाराद्वयव
त्वात्तन्नाभावाधिकरणत्वं निरवयवशब्देन विवक्षितमिति चेन्न अवयवशब्देन प्रदेशवि
वक्षायां सर्वस्याप्यजलपविध्रदेशस्यावयवत्वेनोपदर्शितत्वादवयवाभावप्रसंगात् आत्मपवि
वक्षायामन्यतरासिद्धिर्हेतुः स्यात्। आकाशस्य प्रदेशस्य [illegible] सत्त्वेणाम [illegible] त्वात् तस्मात्त्वदनुमानेन प्रतिपक्षः
। नापि द्वितीयपक्षान्तरं सूक्ष्मस्थले न [illegible] नुमा [illegible] नाप्याकाशोत्पत्तेः संभावितत्वात् अनुकूलतर्कस्याभावात्
नादृत्यस्कृत्यु [illegible] चेदं परमाणूनामनुत्पत्तिमत्त्व
मदन्ये मन्यन्ते [illegible] तथाहि चतुर्विधाः परमाणवः

तदेवं चैतन्यस्य जगत्कारणत्वरूपं लक्षणं तत्कार्योत्पत्तिक्रमं दर्शयति। तमःप्रधानेति। तम
सः प्राधान्यनिर्देशाद्रजःसत्त्वयोरपि तत्र मात्रया वृत्तिर्द्रष्टव्या उक्तमर्थं तत्र सृष्टिक्रमे प्रमाणमा
ह तस्मादिति। नन्वाकाशं नोत्पद्यते निरवयवद्रव्यत्वादात्मवदिति चेन्न उदाहृतश्रुतिबाधि
तविषयत्वेनानुमानानुत्थानात्। प्रत्यनुमानविरोधाच्च। तथाहि। आकाशमुत्पद्यते मदुक्त
मतिभूतत्वात् मृदादिपृथिव्यादिवत्। न चाश्रयासिद्धो हेतुः आश्रयस्याकाशस्यासम्भवादिति
द्धत्वात्। न च धर्मिग्राहकप्रमाणबाधितविषयत्वेनाप्याश्रयासिद्धता हेतोः धर्मिग्राहकप्रमा
णेन शब्दाश्रयत्वाकाशस्यैव धर्मिमात्रसिद्धावपि तद्गतनित्यत्वादेरनासिद्धेः। न चैवस्वरूपा

त तमःप्रधानविक्षेपशक्तिमदज्ञानोपहितचैतन्यादाकाशमाकाशाद्वायुर्वायोरग्निरग्नेरापोऽ॥
द्भ्यः पृथिवी चोत्पद्यते। तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादिश्रुतेः॥ ॥

पक्षे सिद्धः भूतत्वमदृश्यत्वयोः संप्रतिपन्नैः व्याप्यत्वासिद्धो निरुपाधिकत्वात्। न च भूतत्वसावयवत्व
रूपवत्त्वादेरुपाधित्वं रूपं गुणकर्मणोः साध्याव्याप्तेः भूतत्वद्रव्यत्वसामान्यवत्त्वादेस्सा
धनव्यापकत्वात्। अपद्रव्यत्वव्यतिरिक्तावान्तरजातिमत्त्वमुपाधिरिति चेन्न। प्रध्वंससा
ध्याव्याप्तेः तस्योत्पत्तिमत्त्वेऽपि जात्याश्रयत्वाभावात्। न च साध्यस्योत्पत्तिमत्त्वस्य भावधर्मिक
त्वान्न प्रध्वंसे प्रसक्तिरिति वाच्यं। उत्पत्तिमात्रस्यैवाकाशे साध्यत्वात् अन्यथाविप्रतिपत्त्यविष
याणां द्रव्यत्वादीनां धर्मिगतानां साध्यताप्रसङ्गादित्यनुमानाकौशलमापद्येत। न चान्यः कश्चि
दुपाधिरुत्प्रेक्ष्यते [illegible] कारणपिदंतिनः समानन्यायानन्तरिदोतू। येनाहृतं त्वं च

णी सर्वविद्यः सर्वे निमेषा जज्ञिरे इति च श्वेताश्वतरे तैत्तिरीयश्रुतौ कालस्यापि कार्यतामावे
दयतः पुरुषएवेदं सर्वमित्युपक्रम्य दिशः श्रोत्रादिति पुरुषसूक्तस्यात्मिकाश्रुतिः दिशां पुरुषवि
कारत्वं सूचयति। वस्तुतस्तु प्राच्यादिव्यपदेशस्यादित्यगत्युपाधिनानभस एव कल्पितत्वान्ना
काशातिरिक्तो दिक्पदार्थ इति समर्थितव्यं। न च ब्रह्मणोप्युत्पद्यते कारणत्वादाकाशवदिति वाच्यं। अजो
नित्य इत्यादिश्रुतिविरोधात्। असंभवस्तु सतोनुपपत्तेरिति न्यायविरोधाच्च। तेन जगत उत्पत्ति
प्राक्काले ब्रह्मातिरिक्तं वस्तु नास्तीति दर्शितं। अविद्यायाश्चात्मशक्तित्वेन ततः पार्थग्याभावा
ज्जीवानां च तदपरमात्मनिष्पन्नत्वान्न ददृष्टानां च तदुपाध्यंतःकरणनिष्ठानां तत्संस्कारविशे
षाविद्यामात्रत्वेन पृथक्सत्त्वाभावात् विस्तृतं चैतदाचार्यैर्वियदधिकरणादाविति दिक्। अन्य
ते आकाशाद्वायुर्वायोरग्निरित्यादौ आकाशादिभावमापन्नादविद्यासहायाद्ब्रह्मण एव वाय्वा
दीनामुत्पत्तिरिति द्रष्टव्यं तत्तेजोऽसृजत तत्तेज ऐक्षतेत्यादिश्रुत्यंतरे तेजःप्रभृतेरपीक्षण
पूर्वकमवादिस्रष्टृत्वश्रवणात् अचेतनस्य चेक्षणानुपपत्तेः। न्यायोऽपि तदभिध्यानादेव
तु तल्लिंगात्स इति सूत्रमेवार्थं निर्णयति। एतेन प्रधानपरमाण्वादिवादा निरस्ता वेदितव्याः ते सांख्य
ति विरुद्धत्वात् न्यायविरुद्धत्वाच्च। न ह्यचेतनं चेतनानधिष्ठितं किंचित्कुर्वदुपपद्यते रथघ
टादावदर्शनात् अतो न प्रधानवादो आम्नायप्रतीयः तथा परमाणुवादोपि अणवो ह्यः संयो
गस्याप्यप्रवृत्तिनित्वे ... नित्यत्वे निरवयव

रनैकांतिकत्वान्नह्य विपक्षे ... ष्कारः। न च धर्मिग्राहकप्रमाणबाधः। सिद्धे पि तेन धर्मिस्वरू
पेत उत्तमित्यत्वादेरसिद्धेः न च परमाणूनामवधिकापत्त्वे कारणानवस्थानात्किमपि फलं का
रणं जगतः स्यादिति वाच्यं। ब्रह्मण एव जगत्फलकारणस्य स्फुरतीति ज्ञानं पुराणप्रसिद्ध
त्वात्। तथाहि कालात्वनुत्पत्तिमत्त्वे ऽप्यचेतनभावत्वात्पटवत्। न चास्मात्कमविद्यायां व्यभिचा
रः तस्याभावाभावविवित्त द्वित्वाभ्युपगमात्। अन्येपि द्वित्वाभासाः पूर्ववदुद्धरणीयाः। न च सामान्य
विशेषसमवायेषु व्यभिचारः। तत्र सामान्यस्य विचाराभावे ऽस्मस्वरूपानतिरेकात्। अचेतन
त्वहेतोस्तत्राप्रवृत्तेः। तथाहि विशेषास्तावत्सामान्यकल्पिता इति त्वविद्यावादे निरूपितं। त
थाच द्रव्यत्वादीनां सामान्यविशेषाणां सामान्यमात्ररूपाणां सत्तायामंतर्भावः। सत्ताया अपि स्फुरण
विरहितायाः क्वाप्यनुपलंभात्स्फुरणमात्रत्वमुक्तं स्फुरणं च ब्रह्मैव तदेव सामान्यं दर्शनं ज्ञानमित्या
दिश्रुतेः। ब्रह्मतत्पराद्योन्यात्मनो ब्रह्मत्वे दृत्यादौ परब्रह्मस्वरूपातिरिक्तत्वेन ब्रह्मणो ज्ञा
तिविज्ञानमोनिंदान्नवर्णात् न तस्मान्न सामान्यव्यभिचारः। विशेषसमवायौ तु खपुष्पकल्पौ अनयो
र्यथा खपुष्पकल्पत्वं तथाचित्सदानंदलहरीटीकायां प्रपंचितमस्माभिरिति दोषपरस्पते। एतत्प्र
भवेति प्रत्यनुमानबाधिकाः अणोरणीयानिति हि परमाणोरप्यणीयः परमकारणं ब्रह्म ... दर्शि
त्वा यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोस्ति कश्चिदिति तैत्तिरीयश्रुतिस्तत्राति
रिक्तमणुमहत्त्वादिविशेषाणामप्रतिषेधति। असतोधिमनोसृजत मन एतस्माज्जायते प्राणो मनः सर्वेंद्रि
याणि चेति च तैत्तिरीयाथर्वणश्रुतीमनसः उत्पत्तिश्रवणाच्च द्वात्ते तथात्वं कालताकालोगु

ति। सूक्ष्मशरीराणीति। लिंग्यते ज्ञाप्यते प्रत्यगात्मसद्भाव एभिरिति लिंगानि तानि च तानि शरीराणि च शरी
रे प्रविश्य त्वक्शरीरसाधनत्वाद्धर्मादिद्वारेणेति लिंगशरीराणीत्यर्थः। तथा च प्रयोगः विमतानींद्रिया
णि प्राणाश्च स्वातिरिक्तस्वानुगतचैतन्याधिष्ठानपूर्वकप्रवृत्तयोऽचेतनत्वाद्रथादिवदिति श्रुतिश्च भव
ति प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुरिति यो वेदेदं जिघ्राणीति स आत्मा गंधाय
घ्राणमित्यादिका च के पुनः सप्तदशावयवा इति तानाह। अवयवास्त्विति। ननु कथं लिंगशरीरं सप्तदशावय
वमिति तत्राह एते यावता पुर्यष्टकं लिंगं सा च दते सुरेश्वराचार्यैः पंचीकरणवार्त्तिके ज्ञानेंद्रियपंचैव
पंचकर्मेंद्रियाणि च मनो बुद्धिरहंकारश्चित्तं चेति चतुष्टयं प्राणोऽपानस्तथा व्यान उदानाख्यस्तथैव च
एतेभ्यः सूक्ष्मशरीराणि स्थूलभूतानि चोत्पद्यंते। सूक्ष्मशरीराण्यपि सप्तदशावयवकानि लिं
13 गशरीराणि। अवयवास्तु ज्ञानेंद्रियपंचकं बुद्धिमनसी कर्मेंद्रियपंचकं वायुपंचकं चेति॥
च समान इति पंचैताः कीर्त्तिताः प्राणवृत्तयः खं वाय्वग्न्यब्धरित्र्यश्च भूतसूक्ष्माणि पंच च अवि
द्या काम कर्माणि लिंगपुर्यष्टकं विदुरिति अन्यत्र पुनरन्याः शिवगीते भूतसूक्ष्मपंचकं कर्मज्ञा
नेंद्रियपंचकद्वयं चतुर्वृत्तिकमेकमंतःकरणं पंचवृत्तिकएकः प्राण इति सप्तदशावयवा इति अतः
कथं निर्णय इति। उच्यते न चैते आपाततो विकल्पाभ्युपेयते वस्तुनि तद्योगात्। नापि समुच्चयपक्ष
न प्रमाणाभावात्। किंतु लोकस्य सप्तदशकस्यैव संक्षेपविस्तरभेदेन तत्र तत्र कथनं तथादि इ
मे स्थानादि सप्तदशानामवयवानां भूतसूक्ष्माण्युपादानानि। तदुपादाने चाविद्या अतस्योपादानोपादे
ययोरभेदान्नाविद्या भूतसूक्ष्मेभ्यः पृथगिव लक्ष्यते भूतसूक्ष्माणि च लिंगशरीरेभ्यो न पृथगभिप्रयं

योरप्येकस्मिन्नितरस्य संमितत्वात्स्थितिमानुपपत्तिः। तथा च तत्कार्यस्य द्व्यणुकस्यापि परिमितत्वप्रसंगः
किंच द्व्यणुकारंभसमये परमाणू कथंचिद्विक्रियेते न वा। आद्ये अनित्यत्वादिदोषापत्तिः। द्वितीये तद्वि
तीयेपरमाणुस्वरूपवद्व्यणुकादिकार्यस्याणुत्वापत्तिरित्यलं प्रपंचेन। प्रकृतमनुसरामः। तमःप्रधा
नविक्षेपशक्तिमदज्ञानोपहितचैतन्यमाकाशादिकारणमित्युक्तं तत्कथमवगम्यते अत कारणज्ञाने
तमःप्राधान्यमिति तन्नाह। तदुच्यते इति। जाड्याधिक्यदर्शनादित्यत्राधिक्यशब्दं प्रयुंजानः सत्त्वाद्यनुवृत्तिं प्र
दर्शयन्कार्येषु चैतन्यस्यापि ईषदनुवृत्तिं सूचयति। तथा चाहुस्तत्त्वदर्शिनः अस्ति भाति प्रियं रूपं नाम
चेत्यंशपंचकं आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयमिति। विशिष्टोपाद्यदयदस्तिय द्युतितदात्मरूपंना
तेषुच तेषु च आकाशादिषु जाड्याधिक्यदर्शनात्तमःप्राधान्यं तत्कारणस्य तदानीं सत्त्वरजसी अपि।
कारणगुणक्रमेण तेष्वाकाशादिषूत्पद्यंते एतान्येव सूक्ष्मभूतानि तन्मात्राण्यपंचीकृतानि चोच्यं
न्यते तो भाति न चान्यदस्ति स्वभावसंति स्फूर्तिभातिकेवला ग्रस्त्वंगृहीते तिमहाविकल्प इति०। उत्पद्य
माने ह्याकाशादिषु उपादानकारणगुणक्रमात्कार्यानुरूपं गुणत्रयमुपलंभयति। तदानीमिति। कारणस्याव्याकृतस्ये
गुणाः सत्त्वादयस्तेषां क्रमेण तान् गुणानारभ्य यथाकार्यं क्रमेण सत्त्वादिगुणाः संदेव कार्येषु तेषूत्पद्यं
ते इत्यर्थः। नन्वव्याकृतात्यं चतन्मात्राणि क्रमेणजायते इति क्विस्मृतीति तत्सपुराणेषु प्रसिद्धिस्तत्कथमाका
शादेरित्यत्पत्तिरत्पाद्यते इति तन्नाह। एतान्येवेति। एतान्येवाकाशादीनि सूक्ष्मभूतानि व्यवहारात्तन्मात्राणि शब्दा
दितावन्मात्रैकस्वभावानि अपंचीकृतानि परस्परमसंश्लिष्टानि चेति सृष्ट्यादिव्यवहारे तस्याविभागिसिरित्यर्थः।।
तदेवं सूक्ष्मभूतान्यारोपितस्तमुपक्रमेदानीं भौतिकाध्यारोपं प्रतिजानीते। एतेभ्य इति। प्रतिज्ञातेकदेशविवृणो
पं

दात्मकचित्तं चाहङ्कारयोर्बुद्धिमनोभ्यां पृथङ्निर्देशः बुद्धेः स्वपूर्वो विषयस्थित्तस्य पूर्वानुभूतः तथा मन
सो वास्य आभ्यंतरस्य सर्वो विषयो यथायोगं अहंकारस्य त्वनात्मोपरक्त आत्मैवेति अतो विषयभेदाद्
कोत भेदः पृथग्व्यपदेशाच्च तुर्णां संघातः करणभेदानां भौतिकत्वमाह। एतैरिति॥ ॥ उक्तानां ज्ञानेन्द्रि
याणामतः करणानां च भूतगतसात्त्विकांशकार्यत्वे हेतुमाह। एते प्रकाशात्मकत्वादिति। तत्र सत्त्वनि
मित्तत्वात्प्रकाशकमनामयमिति स्मृतेः। सत्त्वकार्यभूतः प्रकाश इन्द्रियान्तःकरणेषु उपलभ्यमानस्तेषां स
त्त्वकार्यतां गमयतीत्यर्थः॥ निरूप्यमाणे लिङ्गशरीरे उक्तैरवयवैः सिद्धमवान्तरभेदं कथयति। इयं बुद्धि
एते प्रकाशात्मकत्वात्सात्त्विकांशकार्यत्वं इयं बुद्धिर्ज्ञानेन्द्रियैः सहिता सती विज्ञानमयकोशो भ
वति। अयं कर्तृत्वभोक्तृत्वाद्यभिमानेन इहलोकपरलोकगामी व्यावहारिको जीव इत्युच्यते॥
रिति। बुद्धिग्रहणेनात्मनो व्याहृतिरभिप्रेता तदुपहितचैतन्यस्य च व्यपदेशभेदमाह। अयमिति
। अयं विज्ञानमयकोशावच्छिन्नश्चिदाभासो जीव इत्युच्यत इत्यन्वयः। तस्य प्राज्ञात्मनो विशेषमा
ह। व्यावहारिक इति। व्यवहारिकमेव विशेषणान्तरेणाप्यनक्ति इहलोक इति। तत्र हेतुमाह। कर्तृत्वे
ति। तथा च श्रुतिः। विज्ञानं यज्ञं तनुते कर्माणि तनुतेपि चेति कर्तृत्वादिकं चैतन्यात्मनो न वास्तवं
किं त्वाभिमानिकमित्यभिप्रेत्याभिमानित्वेनेत्युक्तं। तथा श्रुतिः। समानः सन्नुभौ लोकावनुसंचरति
। ध्यायतीव लेलायतीवेत्याद्या इवशब्देन व्यवहारस्याभासतां दर्शयति तथा न्यायो च कर्ता शास्त्रा
र्थवत्त्वात् यथा च तक्षोभयथेति कर्तृत्वाकर्तृत्वयोर्व्यावहारिकपारमार्थिकत्वेन व्यवस्थापयतः॥

ते कामकर्मणोरप्यंतःकरणवृत्तित्वेन तदाश्रितत्वेन च तद्धर्मत्वान्न पार्थग्र्यविवक्षा अतः पुर्यष्टक
वाक्येन न विरोधः तथापसंतरेपि भूतसूक्ष्माणि तत्कार्येभ्यः पृथक्कृत्वांतःकरणप्राणयोरन्य वृत्तिवृ
त्तिमतोरभेदं गृहीत्वा सप्तदशत्वं निरूपितं। तथा च सप्तदशप्रजापतिरिति श्रुतेः प्रजापतेर्हिरण्यगर्भस्य
सप्तदशत्वावगमात्सप्तदशावयवमेव लिंगशरीरं मुख्यज्ञेयमिति। तदुक्तमभियुक्तैः मुख्यं तु सप्तदशकं प्रथि
तं हि लिंगमिति॥ ६॥ ज्ञानसाधनानींद्रियाणि ज्ञानेंद्रियाणि श्रोत्रादीनि तेषां शब्दस्पर्शरूपरसगंधग्राह
केंद्रियत्वानि प्रत्येकं यथाक्रमं लक्षणानि इंद्रियाण्यहंकारिकाणीति सांख्यास्तन्निराकुर्वंस्तेषां भौतिकत्वं
ज्ञानेंद्रियाणि श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणाख्यानि। एतानि पुनराकाशादीनां सात्विकांशेभ्यो व्यस्तेभ्यः पृथ
क्क्रमेणोत्पद्यंते। बुद्धिर्नाम निश्चयात्मिकांतःकरणवृत्तिः मनो नाम संकल्पविकल्पात्मकांतःकरण
वृत्तिः। अनयोरेव चित्ताहंकारयोरंतर्भावः। एते पुनराकाशादिगतसात्विकांशेभ्यो मिलितेभ्य उत्पद्यंते॥
कथमिति। एतानीति। कारणगुणेनोत्पन्नत्रिगुणानां भूतानां सत्वगुणावच्छिन्नेभ्योंशेभ्यो गुणोद्रेककृतभागे
भ्यः श्रोत्रादीनि जातानीत्यर्थः॥ बुद्धिमनसी लक्षयति। बुद्धिर्नामेति। निश्चयोऽध्यवसायः इदमित्थमेवेति
विषयपरिच्छेदः संकल्प इदं नीलमिदं पीतमिति विषयविवेचनं विकल्पस्तद्विपर्ययः इति भेदः। नन्वंतःकरण
स्य चतुष्ट्वप्रसिद्धेः कथमिदं द्वयमेव गृहीतमित्यत आह। अनयोरेवेति। अनुसंधानात्मिकांतःकर
णवृत्तिश्चित्तं अभिमानात्मिकांतःकरणवृत्तिरहंकारः चित्तस्य बुद्धावंतर्भावः विषयपरिच्छित्तिरूप
त्वाविशेषात् अहंकारस्य मनस्यंतर्भावस्तस्यापि संकल्पात्मत्वाविशेषात्। एवं स्वरूपाभेदेपि विषयभे

त्वं। तथा सति सर्वशरीरव्यापिकार्यानुपपत्तिप्रसंगात्। अपरिच्छिन्नत्वे चोत्क्रांतिगत्यागतिश्रुति
व्याकोपप्रसंगः। स्थूलत्वे चोत्क्रांतिसमये बिलान्निर्गच्छंति इव सर्पाः शरीरच्छिद्रेभ्यो निष्क्रममाणा
नीद्रियाणि प्रत्यक्षेणोपलभ्येरन्। न चोपलभ्यंते तस्मादुक्तप्रकारेणाणूनीद्रियाणि। नन्वग्निर्वाग्भू
त्वा मुखं प्राविशदित्यादिश्रुतेरग्न्यादिदेवतानामेव मुखादिस्थानेषु वागादीद्रियात्मना प्रवेशश्र
वणात्कथमेषां भौतिकत्वमुच्यत इति चेन्नैष दोषः देवतानामध्यात्मिदैविकप्राणात्मना भौतिकदेह
विशिष्टचेतनानामेव स्वर्यभागाद्वाल्मवागादिरूपेण मुखादिष्वव स्थानमेषष्टत्वात्। तथा च भौ
तिकानामपीद्रियाणि देवताशरीराणि चेति न विरुध्यते। यद्वेन्द्रियाण्युक्तलक्षणानि भौतिकान्येव दे
वतानां पुनस्तदधिष्ठातृत्वेन तच्छरीरतया तत्र प्रवेश एवाग्निर्वाग्भूत्वा इत्यादावाम्नायत इति
। तथा च न्यायो ज्योतिराद्यधिष्ठानं तु तदामननादिति। लिंगं च स एतास्तेजोमात्राः समभ्याददा
नो हृदयमेवान्ववक्रामतीति तेजोमात्राणामिंद्रियाणामुत्क्रांतिसमये हृदयप्रवेशमुक्त्वा स यत्र
त्रैष चाक्षुषः पुरुषः पराङ्पर्यावर्ततेऽथारूपज्ञो भवतीत्यादित्यपुरुषस्य च तद्वोपक्रमणं
दर्शयति। ये पुनर्मुख्यप्राणस्य वृत्तिभेदा वागादय इति वदंति तेऽप्यनयैव नीत्या निराकरणी
याः ते हि वाचश्चक्षुस्त्वन उज्ज्ञाय त्वुपक्रम्याऽसुरपापविद्धत्वेन वागादीननुज्ञातं निर्धार्य स
माप्य च वागादिप्रकरणमथ हेममासन्यं प्राणमूचुरिति पृथगेव मुख्यप्राणस्यानिर्दे

15

एवं चन्मनः संकल्पसर्वांतरभेदमाह। मनस्त्विति। कर्मसाधनानींद्रियाणि कर्मेंद्रियाणि तानि विभ
जते। कर्मेंद्रियाणीति। वचनादानगमनविसर्गानंदसाधनेंद्रियत्वं पंचानां कर्मवागादीनां प्रत्ये
कलक्षणं एतेषामपि पूर्ववद्बोधितकत्वमाह। एतानि पुनरिति। ननु कथमिंद्रियाणां भौतिकत्वंनि
र्दिश्यते यत एते भूतयोनेः परमकारणाद्देवात्पत्तिः श्रूयते एतस्माज्जायते प्राणो मनः सर्वें
द्रियाणि चेति। सत्यं श्रूयते तत्राप्यक्रममेवाभिन्नत्वं भूतभावमापन्नात्तस्माद्भूतयोनेरिंद्रियोत्पत्ति
राश्रिता तथा च न्यायः अंतराविज्ञानमनसी क्रमेण तल्लिंगादिति चेन्नाविशेषादिति। न चैतेषां
भौतिकत्वे प्रमाणाभावः अन्नमयं हि सौम्य मन आपोमयः प्राणस्तेजोमयी वागिति श्रौतलिंगस्य प्र
मनस्तु कर्मेंद्रियैः सहितं सन्मनोमयकोशो भवति। कर्मेंद्रियाणि वाक्पाणिपादपायूप
स्थाख्यानि। एतानि पुनराकाशादीनां रजोंशेभ्यो व्यस्तेभ्यः पृथक्पृथक्क्रमेणोत्पद्यंते॥
माणत्वात्। न च वागादिष्विंद्रियत्वमप्रामाणिकमिति वाच्यं। प्रज्ञया वाचं समारुह्य वाचा सर्वाणि स
र्वाणि नामान्याप्नोति इति कौषीतकश्रुतौ च दशेंद्रियैः सह वाचः समभिव्याहृतत्वात् आथर्वणे च
चक्षुश्च द्रष्टव्यं चेत्यादिना सविषयाणींद्रियाण्यनुक्रम्य हस्तौ चादातव्यं चोपस्थश्चानंदयित
व्यं च पायुश्च विसर्जयितव्यं च पादौ च गंतव्यं चेति हस्तादीनामपि सविषयाणां समभिव्याहृ
तत्वात् एतानि चेंद्रियाण्येकादशैव भवंति न न्यूनानि नाधिकानि दशेमे पुरुषे प्राणा आत्मैका
दश इति श्रुत्यनुरोधेन सिद्धांतितत्वात्। अत्रात्मशब्दो मनोविषयः प्राणशब्द इतरेंद्रियविषय इ
ति भेदः। अणुत्वं चैषां परिच्छिन्नत्वे सति सूक्ष्मत्वलक्षणमभ्युपगंतव्यं। न तु परमाणुलक्षण

कण्ठसंबंधस्य प्राणिनः नियतत्वात्कंठस्थानवर्त्ती उदान इत्युक्तं अशनादेः समं नयनात्समान इत्य
र्थः मतांतरमुत्थापयति स्वमतं परिष्करोति । केचित्त्विति । ते प्रसिद्धत्वान्नाह । नाग इत्यादि
ना । उद्गिरणं छर्दिः उन्मीलनशब्दो निमीलनस्याप्युपलक्षणपरः पोषणं पुष्टिः अर्थात्तत्पुष्टि
र्द्धिः । उत्थापितं मतं प्रत्याचष्टे । एतेष्विति । केचिन्मते उक्तेषु प्राणप्रतिपदविमर्शः । एतेषां नागादी
नां प्राणादिष्वंतर्भाव [illegible] दि तस्याप्यमर्षः उद्गिरणं ह्यूर्ध्वमुखस्य वायोः क्रिया ऊर्ध्वमु
खश्च वायुरुदान इत्युक्तं । तथा चोदानेनैवोद्गिरणस्यापि सिद्धौ नागस्य तत्कर्तुरुदानेंत
उदानो नाम कंठस्थानीय ऊर्ध्वगमनवान् उत्क्रमणवायुः समानो नाम शरीरमध्यगोऽ
16 शितपीतान्नपानादिसमीकरः । केचित्तु नागकूर्मकृकलदेवदत्तधनंजयाख्याः
पंचान्ये वायवः संतीति वदंति ॥ नाग उद्गिरणकरः कूर्म उन्मीलनकरः कृकलः
क्षुत्करः देवदत्तो जृंभणकरः धनंजयः पोषणकरः । एतेषां प्राणादिष्वंतर्भावात्प्रा
णादयः पंचैवेति केचित् ।

र्भावान्ततः परयुक्तं उन्मीलनस्यांगचेष्टांतर्गतत्वात्तस्याश्च व्याननिमित्तकत्वादुन्मीलनकर्तुः
कूर्मस्य व्याने तु भावः समानेनाशितपीतादीनां पाकेन रसादिभावमापाद्य सकलशरीरदेशेषु
तत्प्रवेशने कृते सत्येव देहपोषणे तत्कर्तुः कृकलस्य समाने तर्भावः जृंभणस्य निद्रालस्या
दिहेतुकत्वान्निद्रालस्यादेश्च वातुलादेः प्राणापजीवननिमित्तकत्वादन्तर्भावीकरणस्य चापानक ॥ ३१ । ३२

शात् तथा सुषुप्तावपि वागादीनामुपसंहारे मुख्यप्राणस्य सवृत्तिकस्यास्ति जागरणमिति वै
षम्यलिंगाच्च प्राणादिन्द्रियाणां भेदः। एवमादिन्यायकलापो द्वितीयेऽध्याये चतुर्थे पादे
विस्तृतः। इदं पुनर्वेदान्तसारत्वाद्रूपस्य वेदान्तविहितान्यायपालेशतो दर्शिता इति तस्मादुक्त
मिन्द्रियाणां भौतिकत्वादीति स्थितम् ॥०॥ इदानीं वायुपञ्चकं विभजते। वायव इति। प्राग्ग
मनमग्रतो निःसरणं यद्यपि प्राणो हृदय इति स्मृते हृदि प्राण इत्यभिधानाच्च हृदयस्थानः
प्राणस्तथापि नासाग्रे प्रत्यक्षमुपलभ्यमानत्वान्नासाग्रस्थानवर्तीत्युक्तम्। अपानो नाभेरधस्ता
द्गमनवान् मलापनयनव्यापारेण पायुगुदस्थानवर्तीत्यर्थः। आदिशब्दादुपस्थग्रहणं

वायवः प्राणापानव्यानोदानसमानाः। प्राणो नाम प्राग्गमनवान्नासाग्रस्थानवर्ती। अपानो
नामावाग्गमनवान् पाय्वादिस्थानवर्ती। व्यानो नाम विष्वग्गमनवानखिलशरीरवर्ती।

तत्रापि सञ्चरतो विसर्गस्यापानकर्मत्वात् विष्वक् परितः सर्वतो गमनं विद्यते यस्य स तथा
प्राणापानयोर्नियमनकर्मा अरण्यामग्न्युत्पादनादिवीर्यवत्कर्महेतुत्वादखिलशरीरवर्ती
व्यान इत्यर्थः। तथा च श्रुतिः। अथ यः प्राणापानयोः सन्धिः स व्यान इत्युपक्रम्य यथाग्नेर्मन्थ
नमाजेः सरणं दृढस्य धनुष आयमनमप्राणन्ननपानंस्तानि करोतीति॥ यद्यपि चक्षु
षो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्य इति स्मृतेरुत्क्रमणस्य चक्षुरादिद्वारेष्वनियमस्तथापि

तयोः

उक्तं कोशत्रयमन्नमयतेषां प्रतिनियतां व्यवस्थां दर्शयति। एतेषु कोशेषु इत्यादिना। योऽयं विज्ञानम
यः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः इति श्रुतेर्विज्ञानस्य चैतन्यं प्रत्यतिसन्निहितत्वात् ज्ञानशक्तिमत्त्वे
कामः संकल्पो विचिकित्सेत्यादिश्रुतेः कामापरपर्यायायाः इच्छाया मनोवृत्तित्वावधारणादिच्छाश
क्तिमत्त्वं मनोमयकोशस्य स यथा प्रयोग्य आचरणे युक्तः एवमेवायमस्मिन्शरीरे प्राणो युक्तः कस्मिन्नु
त्क्रान्ते उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामि इति स प्राणमसृजतेत्यादिश्रुतेः
प्राणमयकोशस्य क्रियाशक्तिमत्त्वं योग्यत्वादित्यस्यायमर्थः विज्ञानमयस्य तु कर्तृत्वमुपपादितम

एतेषु कोशेषु मध्ये विज्ञानमयो ज्ञानशक्तिमान् कर्तृरूपः मनोमय इच्छाशक्तिमान्करणरू
पः प्राणमयः कोशः क्रियाशक्तिमान्कार्यरूपः योग्यत्वादेवमेतेषां विभागमिति वर्णयन्ति॥

नोमयस्य करणत्वं विवेकसाधनत्वात् आत्मेन्द्रियविषयाणां सन्निकर्षे विद्यमानेपि यदन्व
यव्यतिरेकाभ्यां ज्ञानभावाभावौ तन्मनो विवेकसाधनत्वात् करणपदेनोपातीति युक्तं मनोमय
स्य करणरूपत्वं। तथा च श्रुतिः अन्यत्रमना अभूवं नादर्शमन्यत्रमना अभूवं नाश्रौषमिति त
स्मादपि पृष्ठत उपस्पृष्टो मनसा विजानातीति च। न्यायसूत्रं भवति नित्योपलब्ध्यनुपलब्धि
प्रसंगोऽन्यतरनियमो वान्यथेति। तथातोस्मि पुनं समेतां ततः प्राणो जायते इति श्रुतेः प्राणस्य
वाङ्मनसोऽपि पुनीभ [illegible] मिति ।।।।।।।।।।।।।।।।।।

सत्वादपानएवपरंपरयाल्लभणेहेतौदेवदत्तस्यातभावः अपानाख्यस्यातमुख्यवत्पशरीरातःप्र
वेशतोवायोरन्नस्वीकरणहेतुत्वमैतरेयकेसमाम्नायतेतदपानेनाजिघृक्षत्तदावयदितिरसतोदि
तमासादिक्रमेणशरीरेऽन्नपरिणामेसत्येवपोषणापरपर्यायःपुष्टेःसम्भवाद्रसादिनयनकर्तरि
समानेध्यनेजयस्यातभावइतितथाचप्राणादीनामेवप्रयाणपरमुद्गारादिक्रियानिमित्ततयावस्थां
तरमापद्यमानानांनागादिसंज्ञायाअप्युपपत्तौतत्वान्तरत्वकल्पनेतेगौरवमप्रामाणिकमि
तिभावः। उक्तौचपंचानामेवप्राणादीनांतत्रतत्रश्रवणान्निरूढाचेयंकल्पनाप्राणादयोपि
मुख्यस्यैकस्यप्राणस्यवृत्तिविशेषाएवनतत्वान्तरम् अतःप्राणोपानोव्यानउदानःसमानइतिवृ

एतत्प्राणादिपंचकमाकाशादिगतरजोंशेभ्योमिलितेभ्यउत्पद्यते। इदंप्राणादिपंचकं
कर्मेन्द्रियैःसहितंसत्प्राणमयःकोशोभवति। अस्यक्रियात्मकत्वेनरजोंशकार्यत्व॥॥

हदारण्यकेवृत्तिमतःप्राणस्यनिरूपणानन्तरंवाच्यस्यप्रदिशेत्। तथाचान्यायःपंचवृत्ति
र्मनोवद्व्यपदिश्यतेइतितथामुख्यप्राणोपिवायोर्बाह्यस्यस्वात्मरूपस्यविकारेणशरीरमध्ये
नभोवद्वृत्तिलाभमात्रेणावस्थितःवायुरेवनापिवागादीनांसामान्यवृत्तिरूपावाक्रियाएत
स्माज्जायतेप्राणोमनःसर्वेन्द्रियाणिचखंवायुरितिश्रुतौवायोरिन्द्रियाणांचप्राणस्यपृथग्वनिर्दि
ष्टत्वात्। तथाचन्यायःनवायुक्रियेपृथगुपदेशादिति। अणुश्चेत्यादिन्यायवशादिन्द्रियवदस्मत्वा
दिकमपिप्राणस्यानुसंधेयमितिसंग्रहः॥०॥ प्राणादीनामपिपूर्ववदुपादानविशेषंसंकीर्तयति।

एवमुपहितस्य व्यपदेशभेदानुक्त्वोपाधेरपि तानाह। अस्यैषेत्यादिना। स्थूलप्रपंचो विराट् विज्ञा
नमयादिकोशत्रयं लिंगशरीरं सूक्ष्मशरीरमिति संबंधः मध्यप्रदीपन्यायेनोत्तरत्रापि जाग्रद्वा
सनेत्यत्र कोशत्रयपदं संबध्यते। वासनामयत्वं चास्य श्रुतिराह। तस्य हैतस्य पुरुषस्य रूपं यथा
माहारजनं वासो यथा पांड्वाविकमित्यादि सकृद्विद्युत्तमित्यंतेन स्वप्नत्वं चास्याव्याकृतविराजोः
संध्यस्थानत्वादुपपन्नं संध्यं तृतीयं स्वप्नस्थानमिति श्रुतेरविशेषात् यतो वासनामय अत
एवेति योजना। अस्य लोकस्य सर्वावतो मात्रामुपादाय स्वयं विहृत्येत्याद्या स्वप्नेन शरीरमभिप्र
हत्येषा समष्टिः स्थूलप्रपंचापेक्षया सूक्ष्मत्वात् सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जा
ग्रद्वासनामयत्वात्स्वप्नः अत एव स्थूलशरीरलयस्थानमिति चोच्यते। एतत्समष्ट्युप
हितं चैतन्यं तैजसो भवति। तेजोमयांतःकरणोपहितत्वात्। अस्यापीयं व्यष्टिः स्थूल
शरीरापेक्षया सूक्ष्मत्वादिति हेतोरेव सूक्ष्मशरीरं विज्ञानमयादिकोशत्रयं जाग्रद्वासना
मयत्वात्स्वप्नः अत एव स्थूलशरीरलयस्थानमिति चोच्यते ॥

इत्येतावत्याच श्रुतिः स्थूलशरीरस्य स्वप्ने लयं दर्शयतीत्यत्र सूक्ष्मभेदप्रपंचस्यापि संधौ तं सूच
यति। एवं समष्टिलिंगतदुपहितचैतन्ययोर्व्यपदेशानुक्त्वा व्यष्टिलिंगतदुपहितचैतन्ययोरपि
तानाह। एतदिति। तैजसव्यपदेशत्वे हेतुमाह। तेजोमयेति। तेजोमयत्वं वासनामयत्वं ॥ स्वयं निर्माय
स्वेन भासेति श्रुतेः साः [illegible] ॥ स्थ्वष्टः ॥॥॥॥॥॥ ॥३३

18

एवं सूक्ष्मशरीरस्यावयवानुसन्धिविशेषमाग्निरूप्यावयविनं निर्दिशति। एतत्कोशेति। लिंगं मनोऽथ
त्र निषक्तमस्य अनन्तं वै मनोऽनन्ता विश्वेदेवा इत्यादिश्रुतिषु लिंगशरीरस्यौपाधिकत्ववदुलत्व
वर्णनेन तदेकत्वानेकत्वयोरप्यज्ञानवद्देवत्ववद्व्यवस्थत्वमभिप्रेत्याह। अखिलसूक्ष्मेति। अनयोस्तु व्य
ष्टिसमष्ट्योरेकत्वस्य सूक्ष्ममेव पठ्यते वा पुरेव व्यष्टिर्वा पुः समष्टिरिति वृद्धदारण्यके। समष्टिलिंग
शरीराभिमानिनश्चैतन्यस्याव्यवहारसिद्धानुव्यपदेशविशेषानाह। एतत्समष्टीति। व्यपदेशान्त्रैव
निमित्तमाह। सर्वेत्यादिना। सर्वत्रानुस्यूतत्वात् सूत्रात्माज्ञानशक्तिमदंतःकरणोपहितत्वा

एतत्कोशत्रयं मिलितं सत्सूक्ष्मशरीरमिति उच्यते अत्राप्यखिलसूक्ष्मशरीरमेकबुद्धिविषय
तया वनवज्जलाशयवद्वा समष्टिरनेकबुद्धिविषयतया वृक्षवज्जलवद्वा व्यष्टिरिति च भवति।
एतत्समष्ट्युपहितचैतन्यं सूत्रात्मा हिरण्यगर्भः प्राण इति चोच्यते। सर्वत्रानुस्यूतत्वाज्ज्ञानक्रिया

हिरण्यगर्भः क्रियाशक्तिमदधिदैवत प्राणरूपत्वात्प्राणः तादृगध्यात्मप्राणरूपत्वाद्वा यद्वा ज्ञानक्रि
याशक्तिमत्समष्टिप्राणेन्द्रियसमुदायात्मकं समष्टिलिंगशरीरं तदुपहितत्वात् ज्ञानशक्तिप्राधा
न्येन हिरण्यगर्भः क्रियाशक्तिप्राधान्येन प्राण इति च व्यपदेश इति योजना। तथा च श्रुतिवचनानि वा
युर्वै गौतम तत्सूत्रं वायुना वै गौतम सूत्रेणेति हिरण्यगर्भः समवर्त्तताग्रे हिरण्यगर्भं जनयामा
स पूर्वमिति। कतम एको देवः प्राण इति चैवमादीनि प्राण इति चोच्यत इति च शाकल्कः प्रजापतिर्ब्रह्म

त्यादिव्यपदेशान्तराणि समुच्चीयन्ते॥

[illegible]

19

संभवति। तत्र दार्ष्टान्तिके कस्मादेव प्रासादादेर्निष्पत्तिदर्शनात्। जाग्रद्व
स्थापन्नानां वस्तूनां स्वप्ने भावदर्शनादित्थं तन्नानावासनात्मकानां निर्माणदर्शनादतिस्क
तिनं तत्र रथान रथयोगान पंथानो भवत्यथ रथान् रथयोगान्पथः सृजत इत्यादिना। तस्मा
न्मायामयपाववस्तुप्रपू इति द्रष्टव्यं। तथा च न्यायः मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूप
त्वादिति॥ ३ ॥ पंचैकैकं पृथमात्मादृ। पृथिवीति तेभ्यो गिरिति। आदिशब्दात्तस्मादेव पृथिवीभ्यो
ह्यतरश्वैव भवतीत्यादिश्रुत्यं तरग्रहः। अन्नापीति। अन्नस्य पः। सूक्ष्मशरीरप्रपंचेन
पृथिवीक्रमेकैजेम इत्यादिस्क्तेः। अत्रापि व्याप्तिमसक्तोत्पत्तेः प्रतिपादितयोः सूक्ष्म
तेजसयोरस्य वनदृष्टं वदेव कृत्स्नाकारवत् तुल्याकार संतं वत्तद्वत्प्रतिबिंबा
कारेव स्वाभेदः। एवं सूक्ष्मशरीरोत्पत्तिः। स्थूलभूतानि तु पंचीकृतानि। पंचीकर
णं तु आकाशादिपंचस्वेकैकं द्विधा समं विभज्यते सुदृश सूक्ष्माग्ने सुष्माभमिका
न्ये च भागान्यूत्ये कं च तुर्धा समं विभज्यते तां चतुर्णां भागानां स्वस्वद्वितीयभागा
परित्यागेन भागांतरेषु संयोजनं। तदुक्तं द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः स्वस्वे
सुपमं हरति। एवमिति। एवं त्रप्रतिज्ञातानि स्थूलभूतानि प्रपंचयति। एवं ज्ञानाभेभूतानां प व
रस्परं व्यवहृतप्राणिनिकायव्यवहारनिर्वाहकतदीयपर्यवसंबंधसापेक्षपरमेश्वरसान्निध्या
दिनिमित्तानाधस्तपादिभागानमिलितानां स्थूलतापत्तेः पंचीकरणमित्याहुः पंचीकरणमिति॥ ३४ ॥

आवै प्राणः सवायुरिति श्रुतेः समष्टिव्यष्टिलिंगयोस्तदवस्थयोरपि संख्ययोरभेदं सि
द्धवत् कल्पतत्रतैजससूत्रयोर्योगविशेषं निर्दिशति। एतावितीदानीं स्वप्नावस्थायां नि
द्रादिदोषदूषितस्यापि स्थादिसमुद्बोधितसंस्कारविशेषसचिवस्यांतःकरणस्य यः संस्कारानुरू
पा वृत्तयस्ता दृष्टांतःकरणसंबद्धचैतन्यस्याविद्याशक्तिविजृंभितविषयाकारास्ताभिः सू
क्ष्मविषयान् जाग्रद्वासनामयान् ईषदस्फुटाननुभवतीत्यर्थः। न स्वप्नस्मृतिरपरोक्षावभा
सित्वात्। नापि प्रत्यक्षप्रमा संप्रयोगाद्यभावात्। न च सुषुप्तिः स्थूलविषयानुभवात्। नापि जाग
रितं तदुचितदेशकालनिमित्तानामसंभवात्। तथाहि वपाकेशः सहस्रधा भिन्न इत्यादिना

एतौ सूत्रात्मतैजसौ तदानीं मनोवृत्तिभिः सूक्ष्मविषयाननुभवतः।

केशसहस्रांशो नाडीरूपमीयते ताभिर्वा एतदास्रवदास्रवतीति स्वप्नापत्तादृशनाडीप्रवेशं दर्शय
ति श्रुतिः। तथा चातिसूक्ष्मासु नाडीषु स्वप्नप्रपश्यतानन्तदीसमुद्रवनगिरिनगरीनिवेशो
चितो देशास्ति येन तत्र स्थितान् घटादीन् प्रपश्यत। ननु वहिः कुलायादमृतश्चरित्वेति श्रुतेर्व
हिरेव स्वप्नान् पश्यतीति चेन्न। तत्र वहिः शब्देन स्थूलशरीरोपरागाभावमात्रस्य विवक्षितत्वात्
अन्यथा तस्मिन्नेव शरीरे निःसमेन पुनर्जागरणानुपपत्तेः। तथा च श्रुत्यंतरं कुरुष्वसमय
शयानो नानि प्राभिप्लुतः स्वप्नेपथ चालानच्छिगतस्थास्मिन्प्रतिबुध्यतेति स्वप्नप्राप्तदेशात
पुनरागमनरहितस्यापि स्वप्नदेशस्य शरीरे जागरणं दर्शयति॥ अतो न तत्र जाग्रदुचि
तो देशः। नापि कालस्तदुचितः संभवति स्म द्रष्टुर्नमात्रेपि संवत्सरशतानामनुभवात्। नाप्युचितं नि

नाद्यः सूक्ष्मादस्कृतस्य भूतस्य स्थूलत्वे परमाणोर्व्यणुकादीनामपि स्थूलारम्भानप्रसंगात्। न द्वितीयः इन्द्र
स्कृतापापत्ते विद्यमानत्वात् तयोर्द्विकौ दोष्येते तेजःप्रभृतीनां त्रयाणां सृष्टिस्कृतौ तावत् स्कृ
तेऽनन्तरप्रसिद्धाकाशवायुसृष्टेरप्युपसंहरणीयत्वं वियदधिकरणे तेजोऽधिकरणे चाभि
हितं एकविज्ञानेन सर्वविज्ञानप्रतिज्ञादृष्टान्तादिभिर्हेतुभिस्तत्पाञ्चस्कृत्यं ततरैकवा
क्यतया पंचानां भूतानां सृष्टिं प्रक्रम्यते वा सूक्ष्मतयाऽव्यवहार्याणां व्यवहारसिद्धये
त्रिवृत्करणं श्रुतवतीति श्रुतिः पंचीकरणाभिप्रायापि चेन्न स्यात्तदा वाय्वाकाशयोः सूक्ष्मत्वा
न्निवृत्तेरव्यवहार्यतापत्तौ सूक्ष्माणां भूतानां व्यवहाराय त्रिवृत्करणोपदेशानुपपत्तिः केन
वायं तेन पवनाकाशयोर्व्यवहार एव नास्तीति वाच्यं। महान्वायुर्महन्नभ इति व्यव
हारस्य सर्वजनीनत्वात्। ननु सूक्ष्मत्वमित्येव त्रिवृत्करणं लौकिक्येतेन व्यवहारायेति
चेन्न। त्रिवृत्करणवाक्ये स्वसंबंधिनः फलस्याभावात्फलवत्तदात्मैक्यज्ञानार्थवादत्वेप
पासंक्षिप्त्या यं त्रिवृत्करणमुक्तं। अर्धजरत्यास्वान्याप्रत्वात्। ननु शाखान्तरे भूतद्वयस्
ष्टेः श्रुतत्वात्तत्परित्यागानुपपत्तेः को दोषस्तैत्तिरीयादिश्रुत्योर्विरोधपरिहारायोपसं
हारः क्रियते न तत्पापं पञ्चीकरणं केनचिदुक्तमस्ति येन तत्स्याद्यानुसरणीयः स्यादिति चेत्
सत्यं तथापि न्यायानुसरणं प्रयुक्तं। यथा त्रिसर्गस्कृतौ स्वच्छानां भूतानामस्फुटतरव्यवहार
नामरूपव्याकरणोपायतया [illegible] पञ्चसर्गे श्रुतावपि स्थाना

ननु कथमित्यस्य विभागेन पंचीकरणं निरूप्यते तत्र प्रमाणाभावादित्याशंक्याह। श्रुतीति। से
यं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवा
णीति तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति ईक्षित्वा सा सदाख्यापरमात्मदेवतास्तिसृ
णां देवतानां तेजोबन्नात्मिकानां मध्ये एकैकां देवतां त्रिवृतां त्रिरूपामकरोत् कृतवतीति त्रि
वृत्करणश्रुतिः सापि पंचीकरणमप्युपलक्षयतीति श्रुतिप्रतीत्यर्थः। त्रिवृत्करणं नाम तेजो
बन्नानां त्रयाणां मध्ये एकैकं द्विधा समं विभज्य पुनरेकैकभागस्य द्विधा विभागं कृत्वा स्व
स्वद्वितीयस्थूलभागं परित्यज्यान्यदीयस्थूलभागयोरेकैकभागस्य संयोजनं। अत्र केचि
दप्रमाप्रामाण्यं नाशंकनीयं। त्रिवृत्करणश्रुतेः पंचीकरणस्याप्युपलक्षणत्वात्॥

दि स्थूलत्वे संपादयितव्ये नापंचीकरणं यद्यपि स्थितं तथापि युक्तिरेवात्र वस्तुतिमतं शुभमिः
त्यानात तत्र युक्तिं चेत्यमाचक्षते जगन्नपवतनयोः किंतपयपि व्याप्त्यात्मत्वे रूपवत्त्वमहत्त्वाभ्यां
प्रत्यक्षमत्वेतयोः प्रसज्येतेति तत्र त्रिवृत्करणपक्षेपि तेजसः प्रपिब्यवात्मत्वे काठिन्यद्रवत्वा
भ्यां विशिष्टतयोपलम्भप्रसंग इति चेत् समाधेयं किं तेऽग्निरूपत्वात्तदोष इति परिहारस्य
पंचीकरणपक्षेपि समानत्वेन तुल्यत्वात् व्यवहारमार्गप्राप्तपंचीकृति सिद्धा पंचीकरणस्य
कुत्राप्यश्रवणादिति तत्रैव तत्कथं किं पंचीकरणव्यवहारमार्गसिद्धत्वादप्रमाण्यं किं वा
श्रुतत्वादेक त्रिवृत्करणश्रुतिविरोधादिति। आद्ये अप्रत्यक्ष काकेरणं दोनादि सव्यव
हारणमप्रमाणिक

ऽपेति सर्वज्ञत्वे जन्मैव एतदुक्तं भवति आकाशादीनां प्रत्येकं स्थूलशरीरं प्रतिकारणत्वेन स्व
स्वकार्यापेक्षया व्यापकत्वात् कार्यापेक्षया सर्वलिंगत्वेऽपि न कार्यगतगुणाश्रयत्वप्राप्यसिद्धिः। किंतु
स्वस्वगुणाश्रयत्वमेव तथा कार्याणां स्वकारणापेक्षयाऽल्पत्वात्तेषां कारणभूतमसिद्धतानां
कारणगुणाश्रयतयापि भवत्यभिव्यक्तिरिति। तथा च लोके अनुभवः प्रपंचे शब्दो वायुः प्रज्व
लति ज्वालानदी संघुष्यति स्पृश्यमानः पाषाणः कोष्णतीव्रादिः स्वशीतो नातेजः प्रभृति भूस्वादो
ऽविवाद एव। तच्चैवमनुभवो भ्रान्तिः अबाधकत्वादशास्त्रबाधाद्दर्शनात्। तथा च प्रतिनियताश्रयाश्र

एतेभ्यः पंचीकृतेभ्यो भूतेभ्यो भूर्भुवःस्वर्महर्जनस्तपःसत्यमित्येतन्नामकानामुपर्युपरि विद्य
मानानामतलवितलसुतलरसातलतलातलमहातलपातालनामकानामधोऽधो वि
द्यमानानां लोकानां ब्रह्मांडस्य चतुर्विधस्थूलशरीराणां तदुचितानामन्नपा
नादीनां चोत्पत्तिर्भवति॥

पिशाब्दादयो गुणाः यथायथं भूतान्तरेष्वनुपलभ्यमानानां भूतानां पंचीकृतत्वं गमयंतीति ॥२०॥
पंचभूतारोपप्रपंचमभौतिकारोपमाह। एतेभ्य इति। भूरादयः प्राणिनां कर्मज्ञानफलभोगस्थानवि
शेषाः यथापाठक्रममुपर्युपरि वर्तमानाः सप्त भूमेरधोऽधः पाठक्रमेण वर्तमाना अतलादयः
सप्तेत्येवं चतुर्दशलोकाः। एत एव लोकाः स्थावरजंगमलोकालोकपर्वतनदनदसमुद्रद्वीपवत्
समस्तपृष्ठसंहिताः ब्रह्मांडमित्युच्यते। अस्य च परिमाणमंकतो यत् कोटिचन्द्रात्रिंशत्वेदेवरयाः
...दित्यादितावत्यैतितांपदिवी

वेदान्तसारः ॥

तस्यैवेश्वरस्य भूतयोनेः प्रारब्धान्तरे त्रिवृत्करणरूपः अतः तदुपरित्याजेनान्यस्य कल्पना प्रमा
णाभावात् तस्यैव पंचसर्गे अस्तान्वभ्युपगंतव्यः इति प्राप्ते तस्य पंचीकरणघटत्वमंतरेण पंचानां भू
तानां स्थूलतरत्वव्यवहारोपपत्तेरनुपपन्नेति केचित् त्रिवृत्करणवाक्यस्य पंचीकरणोपलक्षणत्वमिति
। एतेन चरमः पक्षः प्रत्युक्तः त्रिवृत्करणश्रुतेः पंचीकरणपरत्वनिरूपणोक्ते तेन पंचीकर
णस्य विरोधासंभवात् । अस्मिन्नपि पक्षे वर्णितो विद्वन्मैराचार्यैः आकाशस्य सर्वावकाश
तघट प्रदत्वस्य सर्वचेष्टाहेतुत्वेन सर्वाविनाभूतत्वात् तत्रोऽपि तेजः प्रभृतिष्वंत
पंचानां पंचात्मकत्वे समानेऽपि विशेषात् तु तद्वादः इत्यायेनाकाशादिव्यपदेशः संभव
ति । तदानीमाकाशे शब्दोऽभिव्यज्यते वायौ शब्दस्पर्शौ अग्नौ शब्दस्पर्शरूपाणि अप्सु
शब्दस्पर्शरूपरसाः पृथिव्यां शब्दस्पर्शरूपरसगंधाश्च ॥
भौवं स्थितं तत्र त्रिवृत्करणप्रयोगमोक्ताशोऽपि अस्ति श्रेणिभावमर्वेति तस्मादस्ति पंचीकर
णप्रामाण्यं सिद्धमिति दिक् ॥ ५० ॥ ननु पृथिव्यादीनां भूतानां च सर्वभूतात्मकत्वे तथा सति
व्यवहारसांकर्यप्रसंगः स्यादित्याशंक्याह । पंचानामिति । विशेषाधिक्यभावात् भागाधिक्यात् तदादीन
भः पवनस्तेजो जलं पृथिवीत्यादिव्यपदेशः संभवतीति । लोक्याः वैशेष्यात्तु तद्वादस्तद्वादः इत्यधिकरणेन्यायेन
निर्णयः कृतस्तेन न्यायेनाकाशादिव्यवहारसांकर्याभिप्रायः ॥ ५१ ॥ इदानीं भूतानां पंची
कृतत्वे लिंगं चाह । तदानीमिति । तदानीं पंचीकरणानंतरं आकाशे शब्दोऽभिव्यज्यते स्फुटत

त्वमसत्त्वं वा तुल्यवत्प्रसज्येत अवयवस्य वृक्षवदास्मन्मतः संयोगतन्तुन्यायप्रवृत्त्यादिकारणांतरस्या
प्युभयत्र समानत्वस्यापादयितुं शक्यत्वात्। न च प्रत्यक्षाप्रत्यक्षसंवृत्तेः शरीरस्याप्रत्यक्षत्वं
शंकनीयम् प्रत्यक्षाप्रत्यक्षावयववृत्तीनामवयविनामप्रत्यक्षत्वप्रसंगात्। न च स्पर्श
वन्मत्वादेकद्रव्यत्वादाकाशस्यारम्भकत्वानुपपत्तिरिति वाच्यम्। आरम्भवादस्यानंगीकारा
त्। एकस्यापि दुग्धावयविनो दध्यारम्भकत्वदर्शनात्। न च दुग्धावयवैरेव दध्यारभ्यत इति वा
च्यम्। तथा सति दधिदुग्धयोर्गन्धरसादिवैषम्यं न स्यात् दुग्धस्यैव सतः परिणामो दधीत्यभ्यु
पगमे स्यादुग्धादिवैषम्यं स्पर्शोऽन्यमपि द्रव्यं यथा गुणारम्भकं दृष्टं तथा द्रव्यारम्भकमप्य
अत्रापि चेत्तु विध स्थूलशरीरमेकानेकबुद्धिविषयतया वनवज्जलाशयवदामम
ष्टिः वृक्षवज्जलवद्वा व्यष्टिरपि भवति। एतत्समस्तमुपदिष्टं चैतन्यं वैश्वानरो वि
२। राडिति चोच्यते। सर्वनराभिमानित्वाद्विविधं राजमानत्वाच्च।
स्तुक्तिः तु विशरीरस्य सकौशाण्डव्यारब्धतांश्चावयति। अन्नमयति चेत्याविधीयते इत्यादौ
मात्रत्वेनाप्यादपञ्चधात् त्वयं पंचस्वादत्ते युगपत्प्रभुरिति वस्तुतस्तु पंचानां भूतानां
पंचात्मकत्वस्य दर्शितत्वाद् आरम्भवादस्यानंगीकृतत्वात् चान्नाशेदयनादपुरुतदापशाकावकाशा
पीति गुरुमयितन्यं तस्माल्लिङ्गशरीरं पांचभौतिकमिति। अत्रापीति स्वरूपं स्पर्शः। एतत्समस्तमुपदि
तस्य चैतन्यस्य व्यपदेशाभेदतादात्। एतत्समस्तमिति। ... गर्भ उच्यते ह ... सूत्रतमे
वप्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते सर्वे विराड्नादीपुरुषप्राय एवं दसर्वमित्यादि

शरीराणां चानुविध्वंसप्रसजयति। शरीराणीति। अप्योद्देशक्रमं शरीराणि लक्षयति। जरायुजानी
त्यादिना। ननु वैशेषिकाः प्रत्यक्षाप्रत्यक्षवृत्तेरप्रत्यक्षत्वात्पञ्चात्मकत्वं न विद्यत इति वदतोऽप्र
त्यक्षाभ्यां वाय्वाकाशाभ्यां सह पृथिव्यादित्रिसरम्भमाणानां शरीराणामप्यपञ्चत्वं देहप्रसङ्गान्न पां
चभौतिकं शरीरमित्याहुः तत्कथं पञ्चभ्यो भूतेभ्यश्चानुविध्वंसस्तन्नाम स्यात्पत्ति रुच्यत इति चेत् अत्र
त्राहुः अस्ति हि शरीरे सर्वेषामपि भूतानां कार्यसंप्रतिपत्तिः अवकाशाप्यक्षदनपचनलेदनका
ठिन्यानां सर्वजनानुभवसिद्धत्वात्। अतस्तत्कारणतया पञ्चापि भूतान्येकस्मिन्देहे सन्तीति स्थिते

शरीराणि जरायुजाण्डजस्वेदजोद्भिज्जाख्यानि। जरायुजानि जरायुभ्यो जातानि मनुष्यप
श्वादीनि अण्डजानि अण्डेभ्यो जातानि पक्षिपन्नगादीनि उद्भिज्जानि भूमिमुद्भिद्य जातानि
कटवृक्षादीनि स्वेदजानि स्वेदेभ्यो जातानि मशका मशकादीनि॥

यदि तेषां भूतानां देहावयवत्वाभावो वृत्तिलाभमात्रं तेन स्यात् तदा तदपगमानपगमाभ्यां देह
स्यापचयोपचयौ न स्यातां दृश्यते तु तयोः सतोरुपचयापचयौ अतस्तत्तु पटस्य परिवावयवाव
यवित्वमेव पञ्चभूतदेहयोः युक्तं पार्थिवे कार्ये पार्थिवानां भूतानां वृत्तिलाभमात्रत्वे तु तदुप
गमापगमाभ्यां तस्यापचयापचयौ न स्याताम्। न हि वस्त्रस्यान्तरं भक्तसलिलद्रव्याद्युत्कृतस्य तद्व
स्यापामुपचयस्तद्वदुपगमे वापचयोऽस्ति तदा मामविस्तारयोस्तद्वत्स्यात्तदर्शनात्। तथा नात्र
इत्यारपि पार्थिवकपर्वतोपगमापगमाभ्यां परिमाणान्यत्वं न दृश्यते। तथा च यदभूतादावित
पार्थिवे देहे भूतान्तरस्य वृत्तिमात्रं तस्मात् तदविभक्तादिभेदरूपोऽपि विशेषणस्य रसनादीनाम

एवं बहिःस्ववैश्वानरयोरयं विराडात्मनः स्थूलस्यापन्नभोगविषये अयं प्रकारं प्रपंचयति तदानीमित्या
दिना। दिगादिपंचदेवतानियंत्रितेन श्रोत्रादिरिन्द्रियपंचकेन यथायथं क्रमेण शब्दादिग्राह्यांता
न्स्थूलविषयाननुभवत इति प्रत्येकं योजनीयं। अग्न्यादिदेवतापंचकनियंत्रितेन वागादिपं
चकेन वचनादानं दानान्। तथा चंद्रादिदेवताचतुष्टयनियंत्रितेन मनआदिचतुष्केण संक
ल्पादिचैत्यांतांश्चतुरः। सर्वानेतानिति। यथायथं यथोक्तमानुपूर्व्येण सर्वानेतान्स्थूलभोगा
न्विषयाननुभवत इत्यर्थः। अत्रापि प्रमाणमाह। जागरितेति। आदिशब्दात्स्थूलभुग्वैश्वान
र तदानीमेतौ विश्ववैश्वानरौ दिग्वातार्कवरुणाश्विभिः क्रमान्नियंत्रितेन श्रोत्रादीन्द्रिय
पंचकेन क्रमात्। शब्दस्पर्शरूपरसगंधानग्नींद्रोपेंद्रयमप्रजापतिभिः क्रमान्नियंत्रिते
न वागादीन्द्रियपंचकेन क्रमाद्वचनादानगमनविसर्गानंदान् चन्द्रचतुर्मुखशंकराच्यु
तैः क्रमान्नियंत्रितेन मनोबुद्ध्यहंकारचित्ताख्येनांतरेंद्रियचतुष्केण क्रमात्संकल्पनि
श्चयाहंकृतिचैत्याख्यांश्च। सर्वानेतान्स्थूलविषयाननुभवतः। जागरितस्थानो बहिःप्रज्ञ
इति वाक्यशेषः। इदमत्र बोद्धव्यं। जाग्रदवस्थायां द्विप्रमाणप्रमेयव्यवहारा भवंति तत्र प्रमाणो
पाधिप्रमिणोतिस्म प्रमाता येन प्रमिणोति तत्प्रमाणं यत्प्रमीयते तत्प्रमेयमिति सर्वत्र सिद्धांतः तत्र प्रमातृ५
यः प्रमाता जीवश्चेतनः स निर्विशेषप्रमितिचैतन्यकायाप्रत्यासत्त्या प्रमिणोतीति विचारणीयं। आत्मसमनंतरि
यविषयाणां क्रमेण संयोगपरंपरयेति चेन्न। विजयसंयुक्ते तत्संयुक्तेष्वपि संयोगपरंपर
या युगपत्स ... प्रसंगात् ... वेन्द्रियसंबद्धत्वाविशेषादिति नाति

उपहितस्य व्यपदेशान्तरोपाधेरपि नानात्वात्। अस्यैवेति। अन्नं वै विराडिति श्रुतेरन्नविकार
त्वात्स्थूलभोजेति स्थूलभोगः। एवं समष्टिस्थूलतदुपहितचैतन्ययोर्व्यपदेशभेदं दर्शयित्वा
व्यष्टिस्थूलतदुपहितयोरपि तमाह। एतस्यैवेति। व्यष्टिस्थूलशरीरोपहितस्य विश्वशब्द
वाच्यत्वे हेतुमाह। सूक्ष्मेति। सूक्ष्मशरीरं कारणशरीरं तदपरित्यज्य स्थूलशरीरादौ तदुप
हितस्य स्थूलशरीरं लिङ्गशरीरं तदादिर्यस्य परमस्थूलशरीरस्येति तद्गुणमविज्ञानो [illegible]
तस्मिन्प्रविष्टत्वात्। तथाहि। जीवस्य हि त्रय उपाधयः सत्त्वप्रधानो बुद्ध्यादिसंस्कारोपरंजिता

अस्यैषा समष्टिः स्थूलशरीरमन्नविकारत्वादन्नमयः कोशः स्थूलभोगायतन
त्वाज्जाग्रदित्युच्यते। एतदव्युपहितं चैतन्यं विश्व इत्युच्यते। सूक्ष्मशरीरमपरित्यज्य
स्थूलशरीरादिप्रविष्टत्वात्। अस्याप्येषा व्यष्टिः स्थूलशरीरमन्नविकारत्वादेव हेतोरन्न
मयकोशो जाग्रदिति चोच्यते॥

ज्ञानमात्रमुपाधिः स्वप्ने जाग्रद्वासनामयं लिङ्गशरीरमुपाधिः जाग्रदवस्थायां तु सूक्ष्मशरीरसंसृष्ट
स्थूलशरीरमुपाधिः तथा च पूर्वपूर्वोपाधिविशिष्टस्यैवोत्तरोत्तरोपाधिप्रवेशात्सर्वशरीरप्रविष्ट
त्वेन स्थूलभोगायतनाभिमानित्वाद्विश्व इति संज्ञेति। यद्वा सूक्ष्मशरीरं लिङ्गशरीरं तदपरित्यज्य
स्थूलशरीरं विराड्व्यष्टिस्तदादिर्यासां चतुर्दशानां [illegible] त्रिविधया कारणाच्च तत्तत्प्रविष्टत्वादि
ति हेतुयोजना स्थूलशरीरमपरित्यज्येति क्वचित्पाठे स्थूलशरीरं वर्तमानमेव सूक्ष्म शरीर
कारणशरीरयोरप्यनुगत [illegible] लिङ्गशरीरवर्तित्वाद्विश्व इत्युक्तं
वेत्तीति भावः। अस्यापीति पूर्ववदेवेति
व्यष्टिरुच्यते॥

त्तेत्र गतोदकप्रवाहवद्देहमध्याद्देशान्तरगतविषयानपि आप्नोति। एतेन तत्र च तिष्ठत्य
प्यवस्थाप्य स्वात्मचैतन्यं तदात्मनैवाभिव्यज्यते। तत्र देहमध्यान्तःकरणभागावच्छिन्नं
चैतन्यं प्रमातृसंज्ञां लभते। देहविषययोर्मध्ये दीर्घप्रभाकारेणेन्द्रियाणां द्वारा निर्गतान्तः
करणभागावच्छिन्नं प्रमाणसंज्ञां विषयसम्बन्धि आप्य विषयाकारतयावस्थितान्तःकरणभागा
वच्छिन्नं प्रमेयसंज्ञामिति प्रमातृप्रमाणप्रमेयव्यवस्थोपपत्तिः। एवं सम्प्रयोग्येन विषयेण
सहेन्द्रियस्य सन्निकर्षो दूरे वान्तिके वा वर्तमानेन तत्रैव तदाकारमेवान्तःकरणं परिणमते
नान्यत्र नान्याकारं चैतन्यं लभ्यते तदनुरक्तं चैतन्यमात्मनः चैकत्वान्मयेदं विदितमिति संवधा
वभासमश्नोपपद्यते नान्यथा परिच्छिन्नात्मपक्षेऽपि जीवत्वोपाध्यन्तःकरणस्य पूर्वोक्तप्रकारेण
व्यवस्थाभेदसंभवेऽप्यनुगामित्वादुपाधितस्य स्वोपाध्यन्तःकरणस्य सदात्मनो वर्तितव्ये तत्र
दात्मना प्रत्यगात्मचैतन्यस्य सम्यवभासमानस्य स्वग्रहणसमर्थ एकमेव ब्रह्मस्वरूपमनुभवत्य स्मिन्
रितिवाचः पिंडदिसमारूढस्य न वघ्यानं चैव कल्पनाता किं तु कल्पनावस्तुरूपं च स्वप्नदाम
ला किं तु स्कृतिस्मृला। तथा च श्रुतयः स समानः सन्नुभौ लोकावनुसंचरति। ध्यायतीव ले
लायतीव। स धीः स्वप्नो भूत्वेमं लोकमतिक्रामति। नवद्वारे देही देहे लेलायते बहिः। आ
सीनो दूरं व्रजति। मनोमयो विज्ञानमय इत्यादयः। उक्तं च भगवत्पादैः सर्वस्कन्दपेऽहं
ग्रहेदिदिणास निर्लेप्यो मनसा मृदन्नोऽत्र स्मितनमः स्वीयप्रमात्मस्वरूपं ज्ञानं यमस्तु स्नदं

प्रसंग इति चेन्न। इंद्रियसंनिकर्षस्यापीयत्ज्ञानावधारणात् इंद्रियसन्निकर्षानंतरं योर्थः
स्फुरति तावन्मात्रं सन्निकृष्यत इति चेन्न इंद्रियसन्निकर्षस्येयत्तावधारणात्स्फुरणस्य वि
षयनियमस्तस्मिन्सति इंद्रियसन्निकर्षे इयत्तावधारणमिति परस्पराश्रयात्। किंचोक्तसन्नि
कर्षस्य ज्ञानोत्पत्तिमात्रे क्षयित्वात् तदनंतरं तस्यावस्थाने कल्पकाभावान्न ज्ञानस्य विषयेणास
त्संबंधः स्यात्। तथा च मयेदं विदितमिति स्वात्मनि संबंधानुसंधानाभावप्रसंगः। न चाश्रयद्वा
रा संबंध इति वाच्यं। ज्ञानस्य सर्वगतात्माश्रयत्वे युगपत्सर्वविषयसंबंधात्सर्वावभासप्रसंग
:देहावच्छिन्नात्मप्रदेशाश्रितत्वे देहस्य बाह्यविषयासंबंधान्न चात्र किंचिदपि भासेत्।
ननु संबंधाभावेपि ज्ञानतद्विषययोरुद्दिष्ट एव विषये ज्ञानमतिशयं जनयतीति नाव्यवस्थेति चेन्न
अनुद्दिष्टेष्वपि दुर्गंधादिषु ज्ञानकृतातिशयदर्शनात् अदृष्टवशात्किंचिदेवभास इति चेन्न। ते
तस्य दृष्टसामग्रीसंपादकत्वेनान्यथासिद्धत्वात्। अगतिकगतित्वाच्च। तस्मान्न किंचिदेतत्
। अतोत्र कथ्यजीवस्य विषयस्फुरणव्यवहारो व्यवस्थेति तदुच्यते। न तावदस्मन्मतेऽनुपप
त्तिः यतो जीवसर्वगतत्वासर्वगतत्वपक्षयोरंतःकरणकृतावस्था संभवति। तथा
हि। अपरि[illegible]च्छिन्नपक्षे तावदंतःकरणमेव मनोबुद्ध्यादिशब्दवाच्यं प्रमातृत्वादिव्यवहा
रापादकं। ततोऽविच्छिन्नतया सर्वत्राप्रकाशमानमप्यात्मचैतन्यमंतःकरणसंबद्धमव
भासते दर्पणाद्यभिव्यक्तरविरश्मिवत्। तच्चांतःकरणमदृष्टादिसहकृतं विषयसंवेदन
वेलायां तदाकारत्वा

तत्र स्फुरणात् ... इति ... अत्र स्थायामास्माबु उपाधिः स्व
प्रदर्शनहेतुकमहद्बुद्धजागरितमागके ... दोरि जकुरणात् पुनः स्व स्वगोलकस्थाने
सुतपैव बुद्ध्या प्रसारितं स्व स्व स्वपंतत् अनुगतस्थानगोलकादिदेशगके ... अंतः
करणोद्भिपमुच्चिवक्षतं तद्धिं द्विपविलयानन्तुमेयां स्थूलस्थूलत्याव ... कारिकान्यदा अनन्तुम
वतितदिदमस्य जागरितं ॥ तदुक्तं सिद्धिधैर्यो पत्तद्धि जागरितमिति अथ यमेव विश्व
मुत्राप्पनयोः स्थूलव्याप्तिश्रमक्षोभ तदुपहितयोर्विश्ववैश्वानरयोः स्थूलवनवृक्षवनवत्तद्
वच्छिन्नाकाशवच्च जलाशयजलवत्तद्गतप्रतिबिंबाकाशवच्चाप्यभेदः । एवं पंचा
कृतेभ्यः स्थूलप्रपंचोत्पत्तिः । एषां स्थूलसूक्ष्मकारणप्रपंचानामपि महान् किं रेको
महान् प्रपंचो भवति । यथावांतरवनानां महावनैकदेशत्वं यथावांतरजलाशयानां महा
जलाशयैकदेशत्वं एतदुपहिते विश्ववैश्वानरादीश्वरपर्यंते चैतन्यमप्यवांतर
रवनाच्छिन्नाकाशवदवांतरजलाशयप्रतिबिंबाकाशवच्चैकमेव । आभ्यां महत्प्रपंच
तदुपहितचैतन्याभ्यां तप्तायःपिंडवदविविक्तं सदनुपहितं चैतन्यं सर्वं खल्विदं ब्रह्मे
वेतिवाक्यस्य वाच्यं । विविक्तं सल्लक्ष्यमपि भवति । एवं वस्तुन्यवस्त्वारोपः सामान्येन दर्शितः
वैश्वानरात्मनः स्थूलभोगइति । अत्राप्यनयोः स्थूलेत्यादिपूर्ववत् स्थूलप्रपंचाध्यास
मावस्थमुपपादितमुपसंहरति । एवमिति । उक्तं प्रपंच च यंतदुपहितचैतन्यं च यं
... मातमेकीमा ... मिथ्या ... नतु ... ने नगूणेन । एव

धारावद्भिः स्वं इदं ते जानामीति तमेव भांतमनुभात्येतत्समस्तं जगत् तस्मै श्रीगुरुमूर्तये नम इदं श्री
दक्षिणामूर्तये । इति युक्तिरपि मनसो वा इहाविषयदेशगमनाभावे इंद्रियसन्निकर्षपरंपरया
देशांतरे च विषयाकारतास्वीकारेवद्भिरेतावति दूरे यं विषयो मयोपलब्ध इति प्रतिसंधा
नं न स्यात् अनेकयोजनविस्तीर्णदेशांतरस्थितगजाद्याकारभावस्यात्र हृदयेऽनुपपत्तेः । न
च स्वप्नवदुपपद्यत इति वाच्यं । स्वप्नस्य मायामयत्वेनाकृत्वात् । जाग्रदपि मायामयमेवेति
चेत् । सत्यं तथापि स्वप्नाद्भेदव्यवहारभेददर्शितो यतो [illegible] किंचिद्व्यक्तिविशेषसंमति प्रमातरि बाध्य
मानत्वाबाध्यमानत्वाभिमानादिलक्षणः । नन्वरंडवृक्षाकारावृत्तिरंतरेव जायत इति
चेत् । बाढं । मायादिदेशावरणं सुपम [illegible] तीजायते वा इहाविषयात् तथैवमिति वेयमस्तु सा
तु । किंच यदि विषयेंद्रियसंबंधमात्रमंतःकरणस्य विषयाकारता हेतुस्तदा दूरवर्ति
विषयगतपरिमाणरूपसंख्यादीनामपि तदाकाराकारितं तःकरणे पादवदवभास
प्रसंगः । न च दूरत्वदोषात् न भानावभास इति वाच्यं । तस्येंद्रियसंबंधमात्रे प्रति
बंधकत्वाभावात् । ननु तथापींद्रियसंस्काराकारतामनुमस्य इति स्थिते कथं दूरस्थविषये
यत्ताद्याकारतामनसोऽनभवेदिति चेत् मैवं । समस्तु मनसोऽपि दूरस्थात्माद्यावद्भिरवयवै
रवयविभिन्नैश्चक्षुः सन्निकृष्टत्वादन्याद्याकारमेव मनःपरिणामत इति स्थिते तत्र
तु पदार्थसन्निकृष्टेंद्रियेष्वतितत् [illegible] अल्पत्व [illegible] विरोधानादरे पृतस्तदाका
रत्वं तु द्योतयंतीति [illegible] परिस्फुरणं प्रसज्यते ति वैषम्यात् । तस्मादस्ति प्रत्य
[illegible] तैर्विषयाकारेति

परमप्रेमगोचरत्वमात्मन्येव विश्रान्तं इतरस्य सर्वस्यापि तच्छेषत्वेनैव प्रियत्वात् तदेतत्प्रेयः पु
त्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात् सर्वस्मादन्तरतरं यदयमात्मेति श्रुतेस्तस्य सा च प्रीतिः पुत्रादपि
देहे दृष्टा किल सतिरतिशयाच्चेद्दृष्टा अन्यत्र ग्रामे दह्यमाने गृहाद्दौहित्य स्वस्योपस्थिते च पुत्रं परि
त्यज्य स्वस्य पलायनानुपपत्तेरिति पूर्वपक्षः अहं दग्धप्रत्ययस्यात्मानमवगाहत इति सर्ववादि
नामविवादं स चक्षुषा पश्यामीत्यादिना देहावलम्बनोऽनुभूयते अतो देह एवात्मेत्यर्थः ॥१०॥
लोकायतानां चार्वाकविशेषाणां मतभेदानाह। अपरश्चार्वाक इत्यादिना लोके स्थितपतः
प्राकृतेन ग्रन्थेन। अन्वयादिरूपेण वता। प्राणानां वागादीनां प्रजापतिं गमनं तं प्रति प्रश्नक

अपरश्चार्वाकः ते ह प्राणाः प्रजापतिं पितरमेत्योचुरित्यादिश्रुतेः इन्द्रियाणामभावे
शरीरचलनाभावात्काणोऽहं बधिरोऽहमित्याद्यनुभवाच्चेन्द्रियाण्यात्मेति वदति ॥

रणां चाचेतनत्वेन संभवतीत्यनुपपत्त्यातेषां चैतन्यमवश्यं भावीति श्रुतोपपत्तिरिदमानं
न श्रुतिरेवेति द्रष्टव्यं। इन्द्रियाणामभावे उपरमे स्वापादौ देहचलनस्य चैतन्यकार्यस्याद
र्शनात्तदनुपरमे च तद्दर्शनादन्वयव्यतिरेकाभ्यामिन्द्रियाण्येव चेतनानि न देह इति नि
श्चीयते। न चैतत्कादरणत्वेनापि ज्ञानान्वयव्यतिरेकौ [illegible] उपपन्नौ तदा [illegible] चलनस्य [illegible] नम पु
रुषमिति वाच्यं। आत्मन इन्द्रियान्तरकालीनत्वाल्लोकराणां कल्पनायास्तस्य चानुपपत्तेस्तद्देहद्वा
परिसिद्धेर्नान्यत्रोपपत्तिः [illegible] वाचनत्वमबाधितं देहेन्तु

[illegible]

२६

श्रुत्युजातं पदार्थविवेचनमत्रादौ ... न्द्वादिमतोपन्यासेन दर्शयति। इदानीमिति। तत्रा
पतीपुत्रदृष्टान्तन्यायेन मुख्यादिवाक्यान्नन्दमयान्तन्यायेन तत्पक्षं च ... इति दिङ्मात्रेण कतिनमात्मान
दिदर्शयिषुरतिमन्दमतेर्मतं तावदाह। अतिप्राकृत इति। अतिप्राकृतस्तु पुत्र आत्मेति वदती
त्यन्वयः। कुतः इत्यपेक्षायां श्रुतियुक्त्यनुभवाभासान् क्रमेणोपपादयति। आत्मा वा इत्या
दिना। स्वस्मिन्निवेति युक्तिकीर्तनं लोके हि पुत्रेण इष्टं मिष्टं खाद्यादि स्वात्मवच्चनेनापि पुत्रेषु
इदानीं पुत्रस्यात्मनीदमिदं मम यम समारोपयतीति विशेषत उच्यते। अतिप्राकृतस्त्वात्मा
वै जायते पुत्र इत्यादिश्रुतेः स्वस्मिन्निव स्वपुत्रेऽपि प्रियत्वदर्शनात्पुत्रे पुष्टे नष्टे चाह
मेव पुष्टो नष्टश्चेत्याद्यनुभवाच्च पुत्र आत्मेति वदति। चार्वाकस्तु स वा एष पुरुषोऽन्न
रसमय इत्यादिश्रुतेः। प्रदीप्तगृहात्स्वपुत्रं परित्यज्य स्वस्यापि निर्गमनदर्शनात्स्थूलो
हं कृशोहमित्याद्यनुभवाच्च स्थूलशरीरमात्मेति वदति।
सुसर्पं यंतस्ते ... परमप्रेमकृतवतेस्तस्या आत्मत्वमेव युक्तं इयतीतिभावः। पुत्रेण कृश इत्याद्यनुभ
वोक्तिः स्मतान्तरमाह। चार्वाक इति। स्थूलशरीरमात्मेति वदतीत्यन्वयः। अत्रापि श्रुत्याद्युप
मानावदतः प्राग्युपन्यस्तपक्षेद्दृष्टान्... सूचयति। स वा एष इत्यादिना। एवमेव नरदेहोऽपि ... दे
युप्रमाणादित्यर्थः। स्थानेनु ... सर्वे ... पचीनां रेतो रूपेण परिणतानां परिणामः ...
... पुरुषः शिरः पाण्यादिमान् अन्नरसमयो अन्नरसविकारेणान्नरसेनैवोपचीयमानत्वादिति श्रु
तेरर्थः। इदं पुरुषशरीरं लोके आत्मानि प्रयोगात्तस्य च श्रुतावन्नरसमयपदेन प्रयुक्तत्वादेत

अशनायापिपासे येऽन्नप्राणाध्यासेऽत्वं प्रसिद्धमन्नपानयोः रक्ताभि [illegible] दर्शनात्तदाह अयमर्थः प्राणो
ऽहं पूर्णस्य विषयमयं इति प्राण आत्मेत्यनुभव इत्यर्थः॥ मन आत्मवादिमतमनुआयपरति। स्वप्नेत्विति। प्राणाम
यादन्योऽन्तर आत्मेति यावत्। मनसि सुप्ते विलीने प्राणादेरभावाद् इति। स्वप्ने सूक्ष्मदर्शनस्य द्रष्टु
रूपत्वारोपितत्वादिंद्रियाभावे स्वप्नस्मृत्योर्मनसि संप्रतिपन्ने मन एवात्मेत्यर्थः। यद्वा प्राणादेरभावादि
ति तद्व्यापारोपरमे सुषुप्त्यादौ तदभावमुपचर्येदमुच्यते। तथा चेंद्रिये रूपसंहृतव्यापारे सुषुप्ता
तो चोपसंहृतप्राणनापाननेतरवृत्तौ मनस्येव केवलेन स्वप्नादेरुपलंभान्मन एवात्मेत्यर्थः। मनसः
अन्यस्तु चार्वाकोऽन्योऽन्तर आत्मा मनोमय इत्यादिश्रुतेः मनसि सुप्ते प्राणादेरभावात् अहं सं
कल्पवानहं विकल्पवानित्याद्यनुभवाच्च मन आत्मेति वदति। बौद्धस्त्वन्योऽन्तर आत्मा विज्ञान
मय इत्यादिश्रुतेः कर्तुरभावे करणस्य प्राप्तेरभावादहं कर्ताहं भोक्तेत्याद्यनुभवाच्च बुद्धिरात्मेति वद ति
अहं संकल्पादिधर्मवत्त्वं प्रसिद्धमित्यनुभवोक्तेः स्पष्टार्थः। योगाचारमतमुत्थापयति। बौद्धस्त्विति। मनो
मयादन्योऽन्तरोऽन्तरः आत्मा विज्ञानमयः क्षणिकविज्ञानमय इति बौद्धाभिप्रायः बुद्धिः क्षणिकविज्ञान
मात्मेत्यत्रानुभवमाह। अहं कर्तेति। मनस एव कर्तृत्वं स्यात्किं विज्ञानेनेत्याशंक्य मनसः करणपद
पातित्वान्न कर्तृत्वंऽनुभवगोचरत्वमिति अभिप्रेत्य युक्तिमाह। कर्तुरभाव इति। मनसः कर्तृत्वे सर्वेंद्रिया
णां स्वस्वविषये युगपत्संबंधे युगपज्ज्ञानोदयप्रसंगः कर्तुर्मनसः सर्वेंद्रियैरधिष्ठातृत्वेन युगप
त्संनिहितत्वाद्येषां णि [illegible] केनैव मनसस्तु विज्ञानक्रम

[illegible]

मुख्यप्राणत्वादिमनुमुख्यापयति। अपर इति। अन्योऽन्नमयादात्मन इति योजना। सचान्नमयादंतरोऽयं
तर इत्यर्थः। प्राणाभावे प्राणस्य स्वस्थितिनिबंधनान्नाद्यलाभेन कृशीभावे सति इंद्रियाणां विद्यमानाना
मपि स्वस्वविषयप्रवृत्त्यदर्शनात्सति च तस्मिन्नुद्बुद्धत्वदर्शनात्प्राणाधीनस्थितिकानींद्रि
याणीति इंद्रियाणां चैतन्यान्वयव्यतिरेकः करणत्वेनाप्युपपद्यत एवेति प्राणेऽवक्तृत्वे करणाभावप्र
संगः। किंचैकस्मिन् शरीरे इंद्रियाणां संभूयभोक्तृत्वं प्रत्येकं वा द्वितीयेपि युगपत्कर्मणां नानादेशः रू
पादौ च देवदत्तादिसंज्ञिनां भोक्तृत्वादर्शनात्। नहि संभूयेंद्रियाणामेकैकार्यनिर्वर्तकत्वं संप्र
अपरश्चावीको न्योंतरात्मा प्राणमय इत्यादिश्रुतेः प्राणाभावे इंद्रियादिचलनाभावाद
शनपानादिना न क्षुत्पिपासादिनित्याद्यनुभवाच्च प्राणमयआत्मेतिवदति॥
ति नियतासाधारणविषयभेदस्यान्वयव्यतिरेकसिद्धत्वात्। न द्वितीयः। उक्तेन प्रकारेण यौगपद्या
संभवात्प्रत्येकक्रमेण भोक्तृत्वे इंद्रियाणामिति तृतीयेपि पक्षे तेषां प्रत्येकं स्वातंत्र्ये कदाचिदनेकमत्यं
मति विरुद्धदिक्क्रियैस्तैरप्यधिष्ठितं शरीरं विदीर्येत अस्वातंत्र्ये यदधीनत्वं तेषां तस्यैवात्मत्वं युक्तं
स्यादिमन्यन्नासस्य शरीरे कोऽप्यनुपपत्तेः प्राणएव तु मुख्यः सर्वेषामिंद्रियाणां स्वामी [illegible] नहि प्रयुक्तं अतः
प्राणात्मस्वापप्रबोधयोरविच्छिन्नस्वभावः प्रत्येकमिंद्रियाणां [illegible] रागानुपपत्तेरि
[illegible] [illegible] मिंद्रियाणामात्मान इति भावः।

नामज्ञाने ज्ञानमित्यै आत्मनि लमदर्शनाद्भाव दर्शनान् [illegible] मित्ति मुक्तिमत्। तुआदीनामि
ति। सर्वज्ञानाभावस्य सुषुप्तौ संप्रतिपन्नत्वात् सुषुप्तिसाधारि [illegible] मयस्य प्रत्यग्ज्ञाना न ज्ञानमा
त्मा किंतु तदन्य एवेति भावः। अनुभव माह। अदृष्टमिति। अदृष्टमज्ञानत्वेन दृष्टं ज्ञानीना ज्ञान
वा नित्यानुभवोपि ज्ञाताऽत्मनोऽर्थसंबन्धाभिभावेन नभेद्दृश्यत इत्यर्थः॥ मतान्तरमाह। माइति
। माइत्वज्ञानोपहितं चैतन्यमात्मेति वदतीत्यन्वयः अज्ञानोपहितत्वमज्ञानसंवलितत्वं ज्ञानाज्ञा
नरूपत्वं तदपि द्रव्यबोधरूपत्वमिति यावत्। तत्र माण्डूक्यश्रुतिं प्रमाणयति। प्रज्ञानघन इति। प्रज्ञा
नघनः प्रज्ञाने केरसः एवकारेण एतत [illegible] बोधं वारयति आनंदमय इत्यानंदप्रचुरोनानंद

माइत्वप्रज्ञानघन एवानंदमय इत्यादिश्रुतेः सुषुप्तौ प्रकाशाप्रकाशमज्ञा
वात्मानमज्ञानमीमांसा मन्वत [illegible] ज्ञानोपहितं चैतन्यमात्मेति वदति॥

विकारः प्राचुर्यार्थे मयट् इति निर्देशादीषदनानंदस्वभावतोपि द्रव्याणकृतात्मनिगम्यत इति भावः। यु
क्तिमाह। सुषुप्ताविति। सुषुप्तौ प्रकाशाभावे सुषुप्तिरसाक्षिके ति सुखमहमस्वाप्समित्युत्थितस्य प
रामर्शो न स्यात् न तदैन्द्रियमनसां व्यापारोस्ति येन तज्जन्यज्ञानेनापि तत्परामर्शः स्यात्। नाप्यवि
द्याप्रकाशिका जडत्वात् परिशेषादात्मैव बोधांशः प्रकाशक इति प्रकाशसद्भावसिद्धिः न किंचि
दवेदिषमिति परामर्शादात्मन्येव सुषुप्तावशेषविशेषविज्ञानाभावत्वमपि कल्प्यते अत
स्तत्राप्रकाशोऽप्यंशोऽस्त्यात्मनीति भावः। ननु सुषुप्तावेवात्मनो ज्ञानरूपत्वं नावस्थान्तरे इत्याशं

एवं च दृष्टान्तानुपपत्त्या विज्ञानमयकोशापर्यन्तमात्मनः प्रत्यक्त्वमवगमितं । न च क्षणिकविज्ञा
नस्यैव आत्मत्वमध्यवसातुं शक्यं । ज्ञाने च कोपि प्रयत्नसंस्कारस्मृतीनामेकाश्रयत्वनियमात् बाध
कत्वेमिकत्वात् । क्षणिकविज्ञानात्मत्वानुपपत्तिः ज्ञानादीनामेकाश्रयत्वाभावे तु वस्तुनि दृष्टेपू
र्वे दृष्टसजातीयत्वादिलिंगवशादि व्यसाधनं तावदनुमानपूर्वकं प्रवृत्त्याद्यभावः प्रसज्येत अन्यदृ
ष्टेन्यस्य स्मरणानुपपत्तेः । उक्तं च न्यायकुसुमांजलौ नान्यदृष्टं स्मरत्यन्यो नैकं भूतमपि क्रमात् वाम
नाहं क्रमो नास्ति । न चेगत्यंतरं स्थिरइति क्षणिकपक्षे बन्धमोक्षयोरपि वैयधिकरण्यमित्यादिव

प्राभाकरतार्किकावन्योन्तरात्मानंदमय इत्यादि स्फुटं बुद्ध्यादीनामज्ञानेत्व
यदर्शनादहमज्ञोहमज्ञानीत्याद्यनुभवाच्च अज्ञानमात्मेति वदतः ।।।।।।

कुण्डत्वादनादरणीयः क्षणिकविज्ञानात्मपक्षः इत्यभिप्रेत्य वेदवादिपक्षमाश्रित्य विज्ञानादप्यंत
रमात्मानं निर्दिशन् आरभि [illegible] तत्त्वं वाजिमिच्छत्तद्दर्शिमतभेदमाह । प्राभाकरेत्यादिना । प्राभाकर
तार्किकावज्ञानमात्मेति वदतः इत्यन्वयः । अज्ञानं क्षणिकविज्ञानादन्यत् तदधिकरणं द्रव्यरूपमा
त्मतत्त्वमिति वदत इत्यर्थः । विज्ञानमयादप्यंतरे आत्मानि श्रुतिप्रमाणयन्ति । अन्योन्तर आत्मा इति । वि
ज्ञानमयादानन्दमयोन्य इति यावत् । नन्वानंदमयः परमात्मेति स्वपक्षं पंचमध्येन तस्मादादरणं
युक्तमिति चेन्न अन्नमयादिविकारप्रायपठितमयट् [illegible] शिरस्त्वादिवचनविरो
धाच्च एतत् सर्वं भाष्यकारैः आनन्दमयोभ्यासात् इत्यधिकरणे [illegible] तस्मात् युक्तमेव त्वंपदार्थे

त्वमवधारयितुं शक्यते श्रुतिवदनुभवानां प्रत्येकमुपलम्भकत्वादित्यागमं कल्पितमुपन्यस्तास्तैः श्रु-
त्यादयः किन्तु ते सर्वे आभासाः पुत्रादिश्रुत्यपेक्षातिरिक्तप्रयोजनस्य स्वरूपस्य समर्पके प्रबलश्रुति-
प्रत्यक्षानुभवविरोधादित्याह । किं चेति । न केवलं परस्परविरोधित्वाद्देहपुत्रादीनामनात्मत्वं किन्तु
प्रबलश्रुत्यादिभिः पूर्वेषां श्रुत्यादीनां बाधितत्वादपीति योजना । तत्रात्मा वै पुत्रनामासीति श्रुतेः
प्रत्यक्षश्रुत्या बाधः प्रत्यक्षेनाम सर्वान्तरत्वं । स वा एष पुरुषोऽन्नरसमय इति श्रुतेः स्थूलश्रुत्या
बाधः । ते ह प्राणाः प्रजापतिं पितरमेत्योचुरिति श्रुतेः इन्द्रियात्मत्वस्याचक्षुरित्यादिना बाधः । अ-
न्योऽन्तर आत्मा प्राणमय अन्योऽन्तर आत्मा मनोमय इत्यनेन प्राणमनसोरात्मत्वस्य बाधः । अन्योऽन्तर आत्मा वि-
ज्ञानमय इत्यस्याः श्रुतेः कर्तृत्वेन बाध्यः । अन्योऽन्तर आत्मानन्दमय इत्यस्याः श्रुतेस्तत्त्वमित्यनेन बाधः
। प्रज्ञानघन एवानन्दमय इत्यस्याः श्रुतेश्चिन्मात्रमित्यनेन बाधः । असदेवेदमित्यस्याः सदित्यनेन बा-
धः । इति प्रत्येकं योजनीयं । अत्रोदाहृतश्रुतीनामित्यसमुद्धरविन्यासः क्रमेणोदाहृत्य कश्चिद्धीरः प्रत्य-
गात्मानमैक्षत । अस्थूलमनण्वह्रस्वमदीर्घमचक्षुरश्रोत्रं तदपाणिपादं । अप्राणो ह्यमनाः शुभ्रः ।
अनन्तश्चात्मा विश्वरूपो ह्यकर्ता । न चास्ति वेत्ता मम चित्सदाहं । चिन्मात्रोऽहं सदाशिवः । सदेव सोम्ये-
दमग्र आसीत् तत्सत्यं स आत्मेति आदिशब्दात् एवमात्मा सर्वान्तरः अशरीरं शरीरेष्वप्राणस्य
प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुः केन प्राणः प्रथमः प्रैति
युक्तः यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ... साक्षी चेता केवलो निर्गुणः

मिति। अहमित्यात्मनि कर्तरि भासमानेपि मां न जानामीत्यनुपसंहृतविशेषस्य तस्यैव कर्मत्वम
पि तस्मिन्नेव ज्ञाने भासत इत्यवस्थांतरेपि ज्ञात्मकस्यात्मेत्यभिप्रायः। ज्ञानस्यात्मधर्मत्वेपि न तत्ते
त्यं तं भेदस्तादात्म्यांगीकारात्समवायस्य च समवायिभ्यां स्वसंबंधत्वासंबंधत्वविकल्पासहत्वे
नाप्रामाणिकत्वादिति भावः॥ माध्यमिकमतमुत्थापयति। अपरे बौद्धा इति। इदं नामरूपात्मकं जग
दग्रे सद्भेदः प्राक्काले ऽसत् शून्यमेवासीदिति बौद्धाभिप्रायेण। स्फुटतरार्थः। युक्तिमाह। सुषुप्ताविति। तामे
अपरे बौद्धाः। असदेवेदमग्र आसीदित्यादिश्रुतेः सुषुप्तौ सर्वोऽभावादहं सुषुप्तौ नासमित्युत्थितस्य
स्वाभावपरामर्शविषयानुभवाच्च शून्यमात्मेति वदति। एतेषां पुत्रादिशून्यपर्यंतानामनात्म
त्वमुच्यते। एतेरतिप्राकृतादिवादिभिरुक्तेषु श्रुतियुक्त्यनुभवाभासेषु पूर्वपूर्वोक्तश्रुतियु
क्त्यनुभवाभासानामुत्तरोत्तरोक्तश्रुतियुक्त्यनुभवाभासैर्बाधदर्शनात्पुत्रादीनामनात्मत्वं स्प
ष्टमेव। किंच पुत्रस्थूलोऽयं देहः प्राणाः मनः कर्ता चैतन्यं चिन्मात्रं सदित्यादिपूर्ववत्श्रुतिविरोधाद
स्य पुत्रादिशून्यपर्यंतस्य जडस्य चैतन्यभासकत्वेन घटादिवदनित्यत्वादहं ब्रह्मेति विद्वदनुभवप्राबल्या
च्चेतनत्वश्रुतियुक्त्यनुभवाभासानां बाधितत्वात्पुत्रादिशून्यपर्यंतमखिलमनात्मैव॥
वस्वानुभवोपन्यासेन द्रढयति। अहमिति। शून्यमात्मा सर्वाभावरूपेण दुःखबोधात्मक इति भावः। एवं प्रत्य
गात्मत्वाधिष्ठानं मतभेदेनोपन्यस्तं दूषयितुमारभते। तैर्बाधितमिति। तत्र तावत्स्वरूपं वादिमतमुत्त
रोत्तरवादिमतेन दूषितमिति पुत्रादिशून्यपर्यंतस्यात्मा [illegible] रैर्वादिभिः स्फुटीकृतमित्याह।
[illegible] कयत्वादद्वक्षविवादहशनमो

श्रुति विरोधात्। अतः किं तर्हि सांख्योक्तं पुरुषमात्रं लिङ्गं तु मान्ये। स्यात् तावदेवं इत्थं स्यात् स्वभावत्वा
त्सर्वात्मना सम्बन्धानन्तरं आत्मेत्यादि श्रुतेः अपरस्य सदृशस्य रिमाणाः जीवाः। अत्र स्वात्मस्वभावत्वं चास्य प्रवेश
श्रुतिभ्यः। तत्सृष्ट्वा तदेवानुप्राविशत्। स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत। स एष इह प्रवि
ष्ट आनखाग्रेभ्यः अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि। चित्वा धीरो नामानि कृत्वा
भिवदन्यदास्ते। एको देवो बहुधा सन्निविष्टः यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधै
कोऽनुगच्छन् उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा पुरश्चक्रे द्विपदः पुरश्च
क्रे चतुष्पदः पुरः स पक्षी भूत्वा पुरः पुरुष आविशत्। रूपं रूपं प्रतिरूपो बभूव। अग्निर्यथैको भुवनं
प्रविष्टो रूपं रूपं प्रतिरूपो बभूवेत्येवमादिकाभ्यः क्षेत्रज्ञं चापि मां विद्धि। अहमात्मा गुडाकेश सर्वभूता
शयस्थितः। ममैवांशो जीवलोके जीवभूतः सनातन इत्यादिस्मृतिभ्यश्च। संसारित्वानवस्था मेवत
स्योपाधि निबन्धनपरिच्छिन्नपरिमाणं। तच्च यथोपाध्यनुरूपत्वादनियतं। तथा च दर्शयति
श्रुतिः अङ्गुष्ठमात्रो रवितुल्यरूपः आराग्रमात्रो ह्यवरोऽपि दृष्टः। वालाग्रशतभागस्य शतधा क
ल्पितस्य च भागो जीवः स विज्ञेयः नैव स्त्री न पुमानेष न चैवायं नपुंसकः यद्यच्छरीरमादत्ते ते
न तेन स युज्यत इत्यादि वचनैः स च प्रतिशरीरं स भिन्न एव एको देवो बहुधा सन्निविष्टः। एकं सन्तं बहुधा कल्पयन्ति। त्वमेकोऽसि बहून् अनुप्रविष्टः। इन्द्रस्यात्मानं शतधा चरन्तं
बहुधा वदन्ति। एकं सन्तं बहुधा कल्पयन्ति। त्वमेकोऽसि बहूननुप्रविष्टः। इन्द्रस्यात्मानं शतधा चरन्तं
... एकः सन् बहुधा विचचार इत्यादि श्रुतिशतेभ्यः। तस्मादेहेन्द्रियप्राणमनोबुद्ध्यव्याकृत विलक्षण
प्रकाशात्मा नित्यशुद्धः सर्वगतः प्रत्यगात्मेति निश्चितोऽर्थः।

अथ कस्य प्रज्ञानघनस्यैव। सत्तमेतं ततो विदुरित्याद्याः श्रुतयः संगच्छन्ते। इदमत्रानुसंधेयं पुत्रात्मत्व
तिस्तु देहात्मत्वं विनीतितस्य गौणत्वं स्वयमेव ते निषेधा इति तु श्रुतिरर्थवादत्वान्न स्वार्थपरा।
अस्मिन्नपवादेन दत्सत श्रुते मुञ्जादिषीकावत् सर्वान्तरत्वं स्वप्रकाशत्वाच्चात्मप्रतिपत्त्युपायार्थ
त्वेनोपन्यस्तत्वान्न ते आत्मार्थपरत्वं प्रत्यक्षादीनां विज्ञात्युपपत्त्या तत्त्वमस्यादिवचनानां तु वस्तुमात्रो
पक्रमादिलिङ्गैर्यात्मपरत्वमिति युक्तं पुत्रादिषु त्वपर्यन्तं न नित्यं जडत्वात् घटादिवदनि
त्यश्चात्मा तदनित्यत्वे कृतहान्यकृताभ्यागमप्रसङ्गादतो न पुत्रादीनामात्मत्वमिति युक्तिमाह।
अस्मिन्निति। जडत्वमुपपादयति। चैतन्यभास्यत्वेनेति। न चात्मनोपि चैतन्यभास्यत्वे कर्मकर्तृभावविरो
धात्। कर्तृत्वं हि क्रियाप्रति गुणभावः कर्मत्वं तु प्राधान्यं तत्र चैकस्याः क्रियायामेकस्यात्मनो युगप
द्विरुद्धधर्माश्रयत्वे वैरूप्यप्रसङ्गः। नापि ज्ञानान्तरविषयत्वेनात्मनो भानं संभवति। ज्ञानभिन्नस्य ज्ञानकर्म
त्वेनैवापरोक्षत्वनियमात्। नापि नित्यानुमेयोसंदिग्धत्वात्। नहि कदाचिदात्मन्यहं वा नास्मि वेति संदे म
हः कस्यचिदिति एवं परिशेषात् स्वयंप्रकाश इति न तस्य चैतन्यभास्यत्वं। श्रुतयश्च भवन्ति स्वप्रकाशसाधि
काः परप्रकाश्यत्वानुमानविरोधिन्यः न विज्ञातेर्विज्ञातारं विजानीयाः। विज्ञातारमरे केन विजानीयात्
। अन्यदेव तद्विदितादथो अविदितादधि। अत्रायं पुरुषः स्वयंज्योतिः। आत्मैवास्य ज्योतिः। अत्राप्य
मनसाहङ्कारपरिमाणेन सान्तमनुते स्यैवमाद्याः। ननु न चात्मा अणुपरिमाणवान्। तथा सति सकलशरी
रव्यापि चैतन्यानुपलम्भप्रसङ्गात्। नापि देहपरिमाणः। मध्यमपरिमाणवतः सावयवत्वेनानित्यत्व
प्रसङ्गात्। एवं चात्मा कार्यत्वमिति न्यायनिरस्तत्वाच्च। नापि परममहत्परिमाणः। उत्क्रान्तिगत्या गति

प्रत्यक्षमिदं चतुर्विधभूतग्राम च रमकार्यसंगृह्यामि ... ङ्कोत्पादिविषयः
आदिशब्दग्राह्यान्नादिसंगृह्यार्थः भूरादिचतुर्दशभुवनानि तत्तीयैतच्छब्दार्थः। एतत्सर्वमित्यत्रैत
च्छब्द उक्तसमस्तसंग्रहार्थः। एते सामित्यस्यापि स एवार्थः।:०:। उत्पत्तिव्युत्क्रमेणैतत्स्यायमर्थः। पृ
थिवी गन्धतन्मात्रात्मिका रसतन्मात्रात्मकाप्मात्रं भवति। आपश्च रूपतन्मात्रात्मकतेजोमात्रं भ
वन्ति। तच्च तेजः स्पर्शतन्मात्रात्मकवायुमात्रं भवति। स च वायुः शब्दतन्मात्रात्मकाकाशमात्रं भवति।
एतानि शब्दादिविषयसहितानि पञ्चीकृतभूतानि स्थूलशरीरजातं चैतत्सर्वमेतेषां कार
णरूपाऽपञ्चीकृतभूतमात्रं भवति एतानि सत्वादिगुणसहितान्यपञ्चीकृतान्युत्पत्तिव्युत्क्र
मेणैतत्कारणभूताज्ञानोपहितचैतन्यमात्रं भवति एतदपि तत्सर्वं समष्ट्यज्ञानोप
हितं चैतन्यं चेश्वरादिकमेतदाधारभूतानुपहितचैतन्यतुरीयब्रह्ममात्रं भवति।
आभ्यामध्यारोपापवादाभ्यां तत्त्वंपदार्थशोधनमपि सिद्धं भवति। तथाहि अज्ञानादिस
मष्टिरेतदुपहितं सर्वज्ञत्वादिविशिष्टं चैतन्यमेतदनुपहितं चैतन्त्रयं तप्तायःपिण्डव
देकत्वेनावभासमानं तत्पदवाच्यार्थो भवति॥
स चाकाशः स्वकारणभूताज्ञानोपहितचैतन्यमात्रं भवति इति। एतदाधारेत्यत्रैतच्छब्दो ज्ञान
तदुपहितचैतन्यविषयः। एतदध्यारभूतेत्यादि ब्रह्मान्तानां पदानां कर्मधारयः। तथाच
स्मृतिश्रुती भवतः। जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते ज्योतिष्यापः प्रलीयन्ते ज्योति
र्वायौ प्रलीयते वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते अव्यक्तं पुरुषे ब्रह्मन् निष्कले सं
प्रलीयते इति पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति ... ध्यारोपापवादनिरूपणोप

प्रावल्यं [illegible] दर्शयति। अयमिति। तं न पश्यत्यहं तस्मादिसः प्राणान्नेव प्राणो
नानुभवतीत्युपक्रम्य प्राणा... अस्य विज्ञानमहं ... विषयता दोषेणानिंदितां ते त्वात्मे
त्येवोपासीनात्र ह्येते सर्व एकं भवंति इति केवलात्मस्वभावं वेदितव्यं निर्दिश्य तद्वेत
त्पदनीयमस्य सर्वस्य यदयमात्मेति तदतिरिक्तस्य ज्ञातव्यस्यानवशेषं दर्शय
ती श्रुतिः तद्विज्ञानवत एव विद्वत्तां सूचयति। तथोत्तरत्रापि तदाहुर्यद्ब्रह्मविद्य
या सर्वं भविष्यंतो मनुष्या मन्यंते किमु तद्ब्रह्मावेद्यस्मात्तत्सर्वमभवत् तदात्मानमेवावेद
अतस्तत्र नामकं नित्यशुद्धबुद्धमुक्तसत्यस्वभावप्रत्यक्चैतन्यमेवात्मतत्त्वमिति वेदां
तविदनुभवः। एवमध्यारोपः। अपवादो नाम रज्जुविवर्तस्य रज्जुमात्रत्ववत् वस्तुविवर्त
स्यावस्तुनोऽज्ञानादिप्रपंचस्य वस्तुमात्रत्वं। तथाहि। एतद्भोगायतनं चतुर्विधसकलशरी
रजातं भोग्यरूपान्नपानादिकमेतदायतनभूरादिचतुर्दशभुवनान्येतदायतनभूतं ब्रह्मांड
चैतत्सर्वमेतेषां कारणभूतपंचीकृतमात्रं भवति॥
ब्रह्मास्मीति तस्मात्तत्सर्वमभवदिति च विद्वदनुभवत्वं। ब्रह्मात्मज्ञानस्य दर्शयति अतो दे
तोः चक्षुरादिषु बुद्धित्वं गात्रत्वाभिमानो भ्रांतिरिति भावः। प्रसंगात्मविषयाध्यारोपमुपसंह
रति। अत इति। वेदांतविद्वदनुभव इति विशेषणेन मतांतरेऽनुभवस्य कृत्स्नप्रमाणशेषित्वं
सूचयति। अध्यारोपप्रकरणमुपसंहरति। एवमिति। एवमध्यारोपस्वरूपं च निरूप्यापवादमि
दानीं निरूपयितुं लक्षणमाह। अपवादो नामेति। कार्यस्य कारणमात्रतावशेषणाकार
णस्वरूपव्यतिरेकेणाकार्यस्यासत्त्वावधारणं ... प्रवादः ... दोषोऽपवादः केन ... णात्या

गृहस्थप्रसङ्गप्रवृत्त्याभ्यो विलक्षणेष्वस्मादीयि ज्ञातृस्वं पदलक्ष्यार्थ इत्यादि। एतदुपाध्यु
पन्नितेति। पदार्थप्रतिपत्तिरूपत्वं कृत्वा वाक्यार्थप्रतिपत्तेरादावध्यारोपापवादाभ्यां स्पष्टीकृत
रवाक्यावबोधेन पदार्थोपरि बोधे इदानीं महावाक्यार्थं निरूपयितुमुपक्रमते। अथेति।
५८ वाक्यावाक्यार्थप्रतिपत्तिक्रमसमादेशं दर्शयति। इदमिति। उक्तमेव विभजते। संबंधत्रयेणाने
ति।ॐ। उक्तं विभागेनैकस्य सिद्धिवचनं संवादयति। तदुक्तमिति। भिन्नप्रवृत्तिनिमित्तानां
तदुक्तं सामानाधिकरण्यं च विशेषणविशेष्यता लक्ष्यलक्षणसंबंधः पदार्थप्रत्यगात्मना
मिति। सामानाधिकरण्यसंबंधस्तावत् यथा सोऽयं देवदत्त इति वाक्ये तत्कालविशिष्टदे
वदत्तवाचकसशब्दस्यैतत्कालविशिष्टदेवदत्तवाचकायंशब्दस्य चैकस्मिन्पिण्डे तात्प
र्यसंबंधः तथात्र तत्त्वमसीति वाक्येऽपि परोक्षत्वादिविशिष्टचैतन्यवाचकतत्पदस्यापरोक्षत्वा
दिविशिष्टचैतन्यवाचकत्वंपदस्य चैकस्मिंश्चैतन्ये तात्पर्यसंबंधः॥
शब्दानामेकस्मिन्नर्थे तात्पर्यसंबंधः सामानाधिकरण्यमिति सामानाधिकरण्यलक्षणमभिप्रे
त्य तस्योदाहरणं तत्त्वंपदयोरनुवर्तयति। सामानाधिकरण्यसंबंधस्तावदिति॥ तत्कालेति
तीतकालः एतत्कालो वर्तमानकालः परोक्षत्वापरोक्षत्वादिशब्दादेव पदत्वादि ग्रहः अपरोक्ष
त्वादीत्यादि [illegible] यस्यात्मादिग्रहः॥

32

प्रसाक्षिचैतन्यस्यादितीयब्रह्मणः [illegible] त्वाद् [illegible] र्भसन्नस्य [illegible] बुद्धि
रवांतरफलमितिस्वाधितुमशक्य [illegible] ज [illegible] लक्ष्य [illegible] इयोः प्रत्येकं द्विविधोऽर्थो वाच्यो
लक्ष्यश्चेति तत्र तत्पदस्य वाच्यार्थः। तथा हीत्यादिना। सर्वज्ञत्वादिनानाशक्त्युपहित ईश्वरस्तत्पदस्य
वाच्यार्थः। अनुपहितं स्वमहिमनि प्रतिष्ठितं सर्वशास्त्रवाच्यं चिन्मात्रमित्युक्तरूपं तत्पदस्य
वाच्यविविक्तं तत्पदवाच्यार्थ इत्यर्थः॥ आदिपदात्समष्टिहिरण्यगर्भविराजौ गृह्येते तत्राज्ञाना
एतदुपाध्युपहिताधारभूतमनुपहितचैतन्यं तत्पदलक्ष्यार्थो भवति। अज्ञानादिव्यष्टिरेत
दुपहितात्पत्त्वादिविशिष्टचैतन्यमेतदनुपहितं चैतन्यरूपं तत्साक्षिप्रविष्टं वदेकदेशतयावभासमानं
त्वंपदवाच्यार्थो भवति एतदुपाध्युपहिताधारभूतमनुपहितं प्रत्यगानंदं तुरीयं चैतन्यं त्वंपद
लक्ष्यार्थो भवति॥ अथ महावाक्यार्थो वर्ण्यते इदं तत्त्वमसि इति वाक्यं संबंधत्रयेणाखंडार्थ
बोधकं भवति। संबंधत्रयं नाम पदयोः सामानाधिकरण्यं पदार्थयोर्विशेषणविशेष्यभाव
प्रत्यगात्मलक्षणयोर्लक्ष्यलक्षणभावश्चेति।
दिव्यष्टिरित्यत्रादिपदात्सूक्ष्मशरीरं स्थूलशरीरं च गृह्यते॥ एतदनुपहितं प्रत्यक्चितिमात्रं
गोचरं प्रविवेचत उभयत्रापि यथायोगं व्याकृतं समष्टिस्वप्नजागरौ सुषुप्तिर्व्यष्टिस्वप्नजागरौ च
व अवस्थात्रयमुक्तमिति योजयितव्यं। अज्ञानतत्कार्यसमस्तप्रपंचे प्रसक्तास्फूर्तिप्रदत्वेना
नुस्यूतचित्सदानंदात्मकं वस्तु तत्पदलक्ष्यार्थः देहेन्द्रियमनोबुद्धिप्राणाहंकृतितदभिज्ञा

सङ्गत्यनुपपत्तिरिति लक्षणायां प्रसक्तायां लक्ष्यस्याप्रकारेण जहदजहल्लक्षणयोः प्र
सक्तावसंगतौ पदवाच्यगतविरुद्धांशपरित्यागेनाविरुद्धांशलक्षणया सामानाधिकरण्येन वाक्या
दखण्डार्थप्रतिपत्तिरिति भावः॥०॥ अंशांतरपरित्यागेनांशांतरलक्षणायाः शास्त्रप्रसिद्धां संज्ञां
संगिरते। इयमेवेति। जहदजहल्लक्षणेत्यर्थः। अयं भावः तत्त्वंपदयोः सामानाधिकरण्य
तथा चापि वाक्ये तत्त्वंपदयोस्तदर्थयोर्वा विरुद्धपरोक्षत्वापरोक्षत्वादिविशिष्टत्वांशपरि
त्यागेनाविरुद्धचैतन्येन सह लक्ष्यलक्षणभावः। इयमेव भागलक्षणेत्युच्यते। अस्मि
न्वाक्ये नीलोत्पलमिति वाक्यवद्वाक्यार्थो न संगच्छते। तत्र तु नीलपदार्थनीलगुणस्य उत्प
लपदार्थोत्पलद्रव्यस्य च शौक्ल्यपटादिव्यावर्तकतयाऽन्योन्यविशेषणविशेष्यभावसं
सर्गस्यान्यतरविशिष्टस्यान्यतरस्य वा तदैक्यस्य वा वाक्यार्थत्वांगीकारे प्रत्यक्षादिप्रमाणांत
रविरोधाभावाद्वाक्यार्थः संगच्छते॥

33

तावन्नोच्यते न तत्त्वमसि वाक्ये संभवति स्तंभकुंभपदयोस्तददर्शनात्। नापेक्षार्थाभिधायक
त्वेन वैयर्थ्यदुर्व्याप्तिरिति वत् तद्धितादेर्कार्थसमर्थकस्य कारणस्यादर्शनात्। तथाहुः।
व्याप्तिज्ञानादेवतावबुद्धानां वदत्यवैयर्थ्यकृतिः व्याप्तिज्ञापदसन्निधानात् तस्यैव विशेषणमिति।
परिणामादेकार्थलक्षणकलेति। [illegible] सामानाधि[illegible]दिलापित लक्षणयैकार्थ
मुपपत्स्यते नीलमुत्पल[illegible] [illegible] परोक्षत्वस्य विवक्षितत्वादि

व्यवच्छेदकं विशेषणं व्यवच्छेद्यं विशेष्यं तयोर्भावो विशेषणविशेष्यभावः स एव संबंधः संबंधश्च उ
भयनिरूपणीयत्वादित्यभिप्रेत्य विशेषणविशेष्यभावसंबंधं सदृष्टांतमाह। विशेषणेति। सोयं
पदार्थयोर्मध्ये एकस्य वा विशेषणतान्यस्य विशेष्यतालिं तत्र विशेषणत्वं कुत्र इत्यपेक्षायां पदयोरपि
पदार्थयोः परस्परापेक्षया विशेषणविशेष्यभावो भेदमपोद्य स्वविशेषणत्वमित्यभिप्रेत्याह।
अन्योन्यभेदव्यावर्तकतयेति। अभिधेयाविनाभूतप्रवृत्तिर्लक्षणा सा त्रिविधा जहल्लक्षणा अज ह
। विशेषणविशेष्यभावसंबंधस्तु यथा तत्रैव वाक्ये सशब्दार्थतत्कालविशिष्टदेवदत्तस्यायंशब्दा
र्थएतत्कालविशिष्टदेवदत्तस्य चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः यथात्रा
पि वाक्ये तत्पदार्थपरोक्षत्वादिविशिष्टचैतन्यस्य त्वंपदार्थापरोक्षत्वादिविशिष्टचैतन्यस्य
चान्योन्यभेदव्यावर्तकतया विशेषणविशेष्यभावः। लक्ष्यलक्षणसंबंधस्तु यथा तत्र सशब्दा
यंशब्दयोस्तदर्थयोर्वा विरुद्धतत्कालैतत्कालविशिष्टत्वपरित्यागेनाविरुद्धदेवदत्ते
पिंडेन सह लक्ष्यलक्षणभावसंबंधः॥
हल्लक्षणा जहदजहल्लक्षणा चेति। वाच्यार्थमशेषतः परित्यज्य तत्संबंधिन्यर्थांतरे वृत्तिर्जहल्ल
क्षणा। वाच्यार्थापरित्यागेन तत्संबंधिनि वृत्तिरजहल्लक्षणा। वाच्यार्थैकदेशपरित्यागेनैकदेश
वृत्तिर्जहदजहल्लक्षणा। तत्र प्रकृतवाक्ये लक्ष्यलक्षणसंबंधं सोदाहरणमाह। लक्ष्यलक्षण
संबंध इति। पदवाच्यार्थयोः परस्परविरुद्धत्वान्नान्योन्यं विशेषणविशेष्यभाव उपपद्यते। त
था च तत्समर्पकयोरपि पदयोः सामानाधिकरण्यवशात्प्रतीयमानमैक्य

प्रत्याख्यानेन निर्धर्मकं ... केनापि प्रकारेण तत्त्वमस्यादिवाक्यानां संसृष्टार्थनिष्ठत्वं स
कावकाशं लभते न चैतद्वाक्यत्वमेवास्मीतिवत् स्तुतिपरं न तु कर्तृत्वभ्यासे वैयर्थ्यप्रसंगात् नहि स्तुतिः
पुनःपुनः परिचोदनापूर्वकं क्वचिदभ्यस्यते। अत एव नार्थवादः अनन्यशेषत्वाच्च न च यस्मिन्नुप्र
करणेऽन्यत् किंचित्प्रधानवाक्यमुपलभ्यते तच्छेषत्वेनेदमर्थवादरूपं भवेत् नापि राजपुरुषे
राजायमितिवदौपचारिकं अप्रसिद्धितभेदयोरैक्यस्यौपचारिकत्वानुपपत्तेः। नापि विपर्ययः संशयो
अत्र तु गंगायां घोषः प्रतिवसतीति वाक्यवज्जहल्लक्षणा न संगच्छते अत्र गंगाघोषयोराधा
राधेयभावलक्षणस्य वाक्यार्थस्याशेषतो विरुद्धत्वाद्वाक्यार्थमशेषतः परित्यज्य तत्संबंधि
तीरलक्षणा या युक्तत्वाज्जहल्लक्षणा संगच्छते। अत्र तु परोक्षत्वापरोक्षत्वविशिष्टचैत
न्यैकत्वलक्षणस्य वाक्यार्थस्य भागमात्रे विरोधात् भागांतरमपि परित्यज्यान्यलक्षणाया
वात्र संभवति श्रुतेः स्वतः प्रामाण्यात् तस्मात्तत्त्वमस्यादिवाक्यमखंडार्थे निष्ठमकार्यकारण
द्रव्यमात्रनिष्ठत्वे सति समानाधिकरणवाक्यत्वात् सोऽयं देवदत्त इतिवाक्यवदिति तदेवं पद
योरखंडार्थनिष्ठत्वेन सामानाधिकरण्यं वाच्यार्थांशे विरोधात् विना लक्षणां न संगच्छत इत्युक्ते
तत्र भागलक्षणामेव परिशेषयितुं लक्षणांतरं व्युदस्यति। अत्रेत्यादिना। घोषस्याभीरनिवासः
कुत इत्यपेक्षायां गंगापदे जहल्लक्षणा संभवति वाच्यार्थस्य तत्राशेषस्यानन्वयेन परित्याज्य
त्वादित्यर्थः। अत्र गंगाघोषयोरिति। प्रकृते वाच्यार्थस्यांशेन परित्यागाद्भागाजहल्लक्षणासं

34

ननु नीलोत्पलवाक्येऽपि स्यादखण्डार्थत्वानेत्याह। तत्रेति। शौक्ल्यादिव्यावर्त्तकनीलगुणस्य पटादिव्यावर्त्त
कोत्पलद्रव्यस्य च गुणगुणिभावेन विशेष्याभावान्न संसर्गैक्यस्वात् तद्भिन्नतरविशिष्टस्यान्यतरस्य
वा वाक्यार्थत्वान्नाखण्डार्थत्वमुखे वाक्यतत्त्वादि विवक्षितत्वादित्यर्थः।।६।। प्रकृतवाक्ये नीलोत्पलवा
क्याद्वैलक्षण्यमाह। अत्र त्विति। यद्यपि तत्त्वंपदार्थयोः स्वरूपतो न प्रत्यक्षत्वं तत्पदार्थस्याद्वितीयत्वात्
त्वंपदार्थस्य च द्रष्टृत्वान्न दृश्यत्वानुपपत्तेः। तथा च तद्भेदस्याप्यप्रत्यक्षत्वात् तथापि तत्त्वंपदयोः प
रोक्षापरोक्षापाधिगतसंगत्योः श्रवणसमयेऽपरिशोधितपदार्थस्य पुंसो भवति विरोधस्फूर्त्ति
अत्र तु तद्धर्मपरोक्षत्वादिविशिष्टचैतन्यस्य त्वमर्थापरोक्षत्वादिविशिष्टचैतन्यस्य चान्योन्य
भेदव्यावर्त्तकतया विशेषणविशेष्यभावसंसर्गस्यान्यतरविशिष्टस्यान्यतरस्य च तदैक्यस्य
वाक्यार्थत्वाङ्गीकारे प्रत्यक्षादिप्रमाणान्तरविरोधाद्वाक्यार्थो न संगच्छते।
इति तदपेक्षया प्रत्यक्षादिप्रमाणविरोधादित्युक्तं। तथा च तत्त्वंपदयोः शबलांशे व्युत्पन्नयोर्विरुद्धा
र्थविषयकत्वेनैक्यानिष्ठत्वाभावान्न विवक्षितसामानाधिकरण्यमुपपद्यत इति भावः। एतदुक्तं भव
ति नत्वत्र त्वमर्थे नीलोत्पलवद्गुणगुणिभावः उभयोरपि द्रव्यत्वात् नापि कुण्डलसुवर्णवत्कार्यका
रणभावो नित्यत्वादविकृतत्वाच्च। नापि भस्मघटादिवद्धर्मधर्मिभावो निरवयवत्वात् नापि क्रिया
तद्वद्भावो वा गमादौ निष्क्रियत्वात्। नापि जात्यशाबलेयादिवज्जातिव्यक्तिभावो द्रव्यत्वादेव अतएव
न विशेषणविशेष्यभावोऽपि [illegible] विशेषणसमानाधिकरणान्नेतिनेति श्रुतेरिति विरोध

प्रकारांतरेणाज्ञलक्षणा । नैस्यमितिसन्त्वुक्ते । नवेतिलिङ्गुः कुतस्सैकदेशपदस्ययुगपदुभ
यलक्षोदेशोभसंभवादित्यर्थः । अत्राप्येवं कुंदहृष्टणामृङ्गजयाः पदान्तरेणेति । पतितेऽर्थसाया
लक्षणाभंतरेणानार्थवाक्यार्थोपस्थितिरन्तस्त्वेवलक्षणायेकार्थपदसङ्कुसाधितेन पदयोः सामाना
धिकरण्यमित्युपसंहरति । तस्मादिति । सोयमितिवदित्यं वाक्यशब्दार्थः देवदत्तपदस्य सामानाधिक
रण्यसिद्धेःकार्यस्य स्वीकरणार्थत्वादेकदेशविचारानुपयोगात् । तद्वापि पदेकदेशे लक्षणा तथापि अभि

नच तत्पदं त्वंपदं वाक्यार्थविरुद्धांशपरित्यागेन तदंशांतरसङ्गितं तत्पदार्थत्वंपदार्थैवालंबते । अतः
कथं प्रकारांतरेण भागलक्षणाङ्गीकरणमितिवाच्यम् । एकेन पदेन स्वार्थांशपदार्थांतरोभयल
क्षणायाश्चासंभवात् ॥ पदांतरेण तदर्थप्रतीतौ लक्षणया पुनस्तत्प्रतीत्यपेक्षाभावाच्च । तस्माद्यथा
सोयं देवदत्त इति वाक्यं तदर्थो वा तत्कालैतत्कालविशिष्टदेवदत्तलक्षणस्य वाक्यार्थैकदेशे विरो
धादिरूढं तत्कालैतत्कालविशिष्टांशपरित्यज्याविरुद्धदेवदत्तांशमात्रं लक्षयतीति ।

ह्रितान्वयमतवत्पदार्थस्यापि लक्षकत्वमभ्युपगम्यपदार्थैवेत्युक्तं अन्यत्समानं । अत्र केचिदाहुः प
दद्वये लक्षणानुपपन्नासोयं देवदत्त इत्यत्र सशब्देनातीतदेशकालपरित्यागेन लक्षितदेवदत्त
स्वरूपे वर्तमानदेशकालवैशिष्ट्यमयंपदेन प्रतिपाद्यते तथाच पर्यवसितं देवदत्तस्वरूपा
भेदसिद्धेरिति तदयुक्तं विशिष्टस्यकेवलाद्भिन्नत्वात् । यथाकेवलो विशिष्टाद्भिन्नस्तथा विशि
ष्टोपिकेवलाद्भिन्न एव तथाच विशिष्टवाचिपदस्यायंपदस्यापि विनालक्षणां न स्वरूपाभिन्नत्वं
मन्त [illegible] दभावे च न [illegible]

[illegible] पदयोः सामानाधिकरण्यमिति [illegible] ॥

ननु विशेषणांशत्यागेऽपि विशेषणाभावे विशिष्टाभावन्यायेन विशिष्टस्यापि परित्यागाज्जहल्ल-
क्षणैव तत्त्वंपदयोरपि गङ्गापदवत्स्यादित्याशंक्य वैलक्षण्यमुक्त्वाचष्टे। न चेति। यथा पदादेव
वाक्यार्थान्वयिपदार्थप्रतीतौ लक्षणावैयर्थ्यं तथा विशेष्यांशपरित्यागेऽपि लक्षणावैयर्थ्यं तत्त्वंप-
न च गङ्गापदं स्वार्थपरित्यागेन यथा तीरपदार्थं लक्षयति। तथा तत्पदं त्वंपदं वा स्वार्थपरित्यागे-
न तत्पदार्थं त्वंपदार्थं वा लक्षयतु अतः कुतो जहल्लक्षणा न संगच्छते इति वाच्यम्। तत्र तीरपदा-
श्रवणेन तदर्थाऽप्रतीतौ लक्षणया तत्प्रतीत्यपेक्षायामपि तत्त्वंपदयोः श्रूयमाणत्वेन तद-
र्थप्रतीतौ लक्षणया पुनरन्यतरपदेनाऽन्यतरपदार्थप्रतीत्यपेक्षाया अभावात्। अत्र शोणो
धावतीति वाक्यवदजहल्लक्षणापि न संभवति शोणगुणगमनलक्षणस्य वाक्यार्थस्य वि-
रुद्धत्वात् तदऽपरित्यागेन तदाश्रयाश्वादिलक्षणया तद्विरोधपरिहारसंभवादजहल्लक्षणा
संभवति। अत्र तु परोक्षत्वापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणवाक्यार्थस्य विरुद्ध-
त्वात् तदपरित्यागेन तत्संबन्धिनो यस्य कस्यचिदर्थस्य लक्षितत्वेऽपि तद्विरोधापरिहारादऽ-
र्थातिरिक्तस्य तत्संबन्धिनो वाक्यार्थान्वयिनोऽर्थस्याप्रसिद्धेरिति भावः। अजहत्स्वार्थामप्यत्र दू-
षयति। अत्र शोणादिति। शोणपदे स्ववाच्यशोणगुणापरित्यागेन तदाधारे लक्षणावत्तत्पदे
त्वंपदे च स्ववाच्यापरित्यागेन तत्संबन्धिनो यस्य कस्यचिदतिरिक्तविशेषस्यापीतरस्याप्र-
तीत्यैल्लक्षणांगीकरणासंभवाच्च विरोधस्यापरिहारादजहल्लक्षणाप्यत्र न युज्यत इत्यर्थः॥

द्वस्तज स्यात्मात्वीति र २ तिष्क [illegible] तें [illegible] दृं. [illegible] देत इिन्नरो दासा. तं जनयतः शास्त्रस्य
प्रामाण्याजनेः किं च स्रोत स्य परादाल्वा परीक्षत्वेन कारणानिबंधने किं त्वर्थनिबंधने एकस्यैव
मनुसःस्त्वादे लिप्यकापरो क्षत्वज्ञान हेतुत्वस्यातीतःधस्य तिहेतुत्वस्यच दर्शनात् तत्र सदका
रिभेदात् भाबे इतिचेन्न तदोसाप्यास्ति सहकारिभेदः शाब्दप्रतिपत्तुः शब्दार्पने कस्मालेकत्व
क्षणः निकटं स्थितं तमात्मनः स्वरूपं ब्रह्मानन्दस्वरूपमुपाध्यंतराविष्यमिं द्वयरूणादि [illegible] तस्मःश्राम
स्वकंसीस्याद्द [illegible] वतत्वमः शादिवाक्यानामपरोक्षज्ञानजनकत्वं युक्तमितिभावः [illegible] वमुत्यनोरव

36 मातुश्चित्य [illegible] तेबिंबसहितामतीप्रत्यग्यसिन्नमज्ञातं परंब्रह्मविषयीकृत्यत इत्ताज्ञानमेव [illegible]
ते यथापटकारणतं तुदाहे पटदाहवदविलक्षकार्यकारणोऽज्ञाने बाधितेसति तत्कार्यमारब्धिन्न
स्य बाधे [illegible] तदेतन्तं तारवंडाकाराकारिताचित्तवृत्तिरपि बाधिता भवति॥
ऽकाराचित्तवृत्तेः किं करोतीति तदाह। मात्विति। वृत्तेजेऽज्ञानादज्ञानबाधजाभ्यमवमा [illegible] क्वलाविशिनष्टि
। चित्प्रतिबिंबसहितासतीति। प्रत्यक् चितिव्याप्तेति यावत्। ब्रह्मणो विषयीकरणंनाम [illegible] लदाभिमु
रव्यं। ब्रह्मशब्दस्यकार्यं ब्रह्मविषयत्वं व्यावर्तयति। परमिति। तत्पदप्रमेयत्वमाह। अज्ञातमिति। त
स्यताटस्थ्यं वारयति। प्रत्यगाभिन्नमिति। अज्ञानमेव बाधत इत्येवकारेण ब्रह्मणः प्रकाश्यत्वं व्याव
र्त्यते। एवं विधयाचित्तवृत्त्या संसारमूलाज्ञाने बाधिते सत्यध्यस्यापह्नते बाधका भावान्नेत्यापि सम्प्रप
चः स्यादित्यतस्त्राह। तदिति। वृत्तेर्बाधकाभावेपि दग्धपटन्यायेनत्वतस्स्वयमेव विनश्यतीतितोनसप्र

अपरे पुनराहुर्नेदं वाक्यार्थयोः पारस्परिकविरोधाल्लक्षणाश्रीयते किंतु वाक्यार्थैकदेशतात्पर्याभा
वादिति। तन्न तात्पर्याभावावगमस्यापि विरोधस्फूर्त्यधीनत्वात्। अन्यथा वेदवाक्यप्रतिपादिते
ष्वैसंवादिविसंवादिप्रमाणांतरविषये तात्पर्यानवगमायोगात्। तस्मात्तु युक्तं वाक्यार्थैकदेशे
विरोधादिति। तदेवं महावाक्ये तत्पदं लक्षणेति ग्राहयंति चेति न्यायेन जीवस्य नित्यशुद्धबुद्धमुक्तस
त्यज्ञानानंतानंदपरिपूर्णब्रह्मलक्षणोपदेशादनुपपन्नस्वरूपं चेतिरूप्येदानीमवगतस्वरूपस्या
नुभववाक्यार्थविचाराः प्रवर्णयितुमुपक्रमते। अथेति। उपदेशवाक्यनिरूपणानंतरमथ पश्चा
तथा तत्त्वमसीति वाक्यं तदर्थोपपरोक्षापरोक्षत्वादिविशिष्टचैतन्यैकत्वलक्षणास्य वा
क्यार्थस्यांशविरोधाद्विरुद्धपरोक्षत्वापरोक्षत्वविशिष्टांशं परित्यज्याविरुद्धचैतन्यमात्रं
लक्षयतीति। अथाधुनाऽहं ब्रह्मास्मीत्यनुभववाक्यार्थो वर्ण्यते। एवमाचार्येणाध्यारो
पापवादपुरःसरं तत्त्वंपदार्थौ शोधयित्वा वाक्येनाखंडार्थेऽवबोधितेऽधिकारिणः अहं नित्य
शुद्धबुद्धमुक्तसत्यस्वभावपरमानंदानंताद्वयं ब्रह्मास्मीत्यखंडाकाराकारिता चित्तवृत्तिरुदेति॥
अस्यार्थः अधिकारिणो विधिवदधीतवेदत्यादिलक्षणोक्तलक्षणस्य असंभावनाविपरीतभावनाख्यचि
त्तदोषरहितस्याध्यारोपापवादन्यायेनाचार्योपदेशसमनंतरमेव नित्यशुद्धबुद्धत्वादिविशेषणवि
शिष्टं ब्रह्माहमस्मीत्यखंडाकाराकारिता चित्तवृत्तिरुदेति साक्षात्काररूपा न पुनः परोक्षाकारितेत्यर्थः। न च
शब्दस्यापरोक्षज्ञानजनकत्वं [illegible] भाष्यादौ [illegible] परोक्षापि चित्तवृत्तिरुदेतीति वाच्यं। सत्यं सदादपरोक्षा।

ननु ब्रह्मफलव्याप्यत्वं शास्त्रा[illegible]ं [illegible]प्रत्यग[illegible] [illegible]ब्रह्मा[illegible]कारवृत्तिः सर्व
मिकार्यनाशो वृत्तिव्याप्तिरपेक्षिता[illegible] [illegible]स्वप्रकाशत्वमुपाधिरूप[illegible]स्य[illegible]
यत्वमनुपाधि[illegible] [illegible] [illegible]तद्वृत्तं तमुपपादयति। तथा दीपादि[illegible]
इति शब्दोऽनुभव[illegible] [illegible]सामञ्जस्यं तद्रूपदेशादिति न्यायमाश्रित्यैवं वि
षयसाक्षात्कारस्वानुभवरूपपर्यन्तं [illegible] श्रवणादिसाधनजातं निरूपयितुमारभते। एवमित्या
[illegible]तद्गताज्ञान[illegible] चित्तवृत्तेर्विशेषोऽस्ति तथाह्ययं घट इति घटाकाराकारितचित्तवृत्ति
रज्ञातं घटं विषयीकृत्य तद्गताज्ञाननिरसनपुरःसरं स्वगतचिदाभासेन [illegible] जडं घटमपि भा
सयति तदुक्तं बुद्धित[illegible] [illegible]दाभासौ द्वावपि व्याप्नुतो घटं तत्राज्ञानं धिया नश्येदाभासेन
न घटः स्फुरेत् यथा दीपप्रभामण्डलमन्धकारगतं घटपटादिकं विषयीकृत्य तद्गतान्धकार
निरसनपुरःसरं स्वप्रभया तदपि भासयतीति एवंभूतस्वस्वरूपचैतन्यसाक्षात्कारपर्यन्तं श्र
[illegible]मनननिदिध्यासनसमाध्यनुष्ठानस्यापेक्षितत्वात्तेऽपि प्रदर्श्यन्ते॥
ना। तथा च श्रुतिः तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् बाल्यं च पाण्डित्यं निर्विद्याथ मुनि
रिति पाण्डित्यबाल्यमुनिशब्दैः क्रमेण श्रवणमनननिदिध्यासनानि विधीयन्ते तथा तस्माभिध्याना
ज्ञानात्तत्त्वभावाद्भूयश्चान्ते विश्वमायानिवृत्तिरिति श्वेताश्वतरीये मन्त्रः समाधिमप्युपलक्षयति सूत्रं च
यति सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवदिति न्यायेनापि समर्थनी[illegible]ः॥

तर्हि वृत्तिप्रतिबिंबितचैतन्यस्य का गतिरिति तत्राह। तत्रेति। तत्र प्रतिबिंबितं चैतन्यमपि त्रिविधं
उपहितं वृत्तेर्विच्छिन्नत्वात् तत्तदुपाधिभिन्नपरब्रह्मस्वरूपमात्रं भवतीत्यन्वयः। स्वोपाधिविलये उपहितस्य
स्वस्वरूपमात्रावस्थाने दृष्टान्तो दर्पणाभाव इति। उपाध्यनुगामिनो निरुपाधिप्रकाशनासामर्थ्ये
दृष्टान्तमाह यथा दीपप्रभेति। यथा परिच्छिन्नप्रकाशस्य परिच्छिन्नावभासने दृष्टान्तो यथा दी-
पेति। वाक्यार्थस्तु तत्र स्वात्माकारवृत्तिनिष्ठत्वज्ञानमेव बाध्यते न तु तत्प्रकाश इति। विशेष
तत्र प्रतिबिंबितं चैतन्यमपि यथा दीपप्रभा आदित्यप्रभाऽवभासनासमर्था सती तदभिभूता
भवति। तथा स्वयंप्रकाशमानब्रह्मणाभिन्नपरंब्रह्मस्वावभासनाऽनर्हत्वात्तेनाभिभूतं सत्स्वोपा-
धिभूताखण्डवृत्तेर्विच्छिन्नत्वात् दर्पणाभावे मुखप्रतिबिंबस्य मुखमात्रत्ववत्तत्तदुपाधिभिन्नपरब्र-
ह्ममात्रं भवति। एवं च सति मनसैवानुद्रष्टव्यं यन्मनसा न मनुत इत्यनयोः श्रुत्योरविरोधः।
वृत्तिव्याप्यत्वाङ्गीकारेण फलव्याप्यत्वप्रतिषेधप्रतिपादनात्। तदुक्तं फलव्याप्यत्वमेवास्य शास्त्र-
कृद्भिर्निवारितं ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षितेति। स्वयंप्रकाशमानत्वाभास उपयुज्य
निरूपणीयफलितमाह। एवं चेति। अविरोधः सिद्ध इति शेषः। तत्रैव शब्दसूचितमर्थं हेतुमाह। वृत्तिव्याप्यत्वे
ति॥ शिष्टशब्दादिप्रमाणात्तत्त्वमस्यादिवाक्याकारधीसमुत्पन्नाभिव्यक्तं वृत्तिव्याप्यत्वं। तदेव हि प्रसन्नि-
हितं व्याप्यत्वात् रत्नाद्यवभासनेन [illegible] फलव्याप्यत्वमिति भेदः। उक्तेऽर्थे
वृद्धसम्मतिमाह। फलव्याप्यत्वमिति। फलव्याप्यत्वाभावे [illegible] तत्रैव साधयति। स्वयंप्रकाशेति॥

नैव कृतः

श्रीरुद्रेन

एवं षारवान्तरे [illegible] उपक्रमोपसंहार [illegible] पत्ति [illegible] आत्मैवेदोपासीतात्र हि
ते सर्व [illegible] उपक्रमः [illegible] इति उपसंहारः सप्तमनेतिनेत्यादौ अभ्यासः तं त्वौपनिषदं पुरु
षं पृच्छामीत्यपूर्वत्वं [illegible] [illegible] फलं [illegible] इत्यादिफलं तद्यो यो देवाना
मित्यादिरर्थवादः [illegible] इत्याद्युपपत्तिः [illegible] तैत्तिरीये ब्रह्मविदाप्नोति परमित्युपक्रमः आनं
दो ब्रह्मेति [illegible] इत्युपसंहारः सत्यं ज्ञानमित्यभ्यासः यो वेद निहितं गुहायामित्यपूर्वतादृचनं
[illegible] उपनिषत्सु [illegible] तत्र पूर्व [illegible] अर्थवादः यथा तत्त्वमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं
[illegible] [illegible] विज्ञातमित्यद्वितीयवस्तुप्रदर्शनं। प्रकरणप्रतिपाद्यार्थसाधने तत्र श्रूयमा
णा युक्तिरुपपत्तिः [illegible] सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं विकारो नाम
धेयं मृत्तिकेत्येव सत्यं [illegible] वस्तुसाधने विकारस्य वाचारंभणमात्रत्वयुक्तिरुपपत्तिः
[illegible] मननं [illegible] तस्याद्वितीयवस्तुनो वेदान्तार्थानुगुणयुक्तिरनवरतमनुचिंतनं। नि
[illegible] अयमर्थवादः [illegible]
[illegible] इति फलश्रुतिः सोऽकामयतेत्याद्यर्थवादः [illegible]
[illegible] इतिदेवदत्त [illegible] वेदांतमेजं न नौ विदुरिति कोऽह्येवान्यात्कः प्राण्यात् यदेष आ
काश आनन्दो न स्यादित्याद्युपपत्तिः [illegible] अथ परयातदहरं [illegible] इत्याद्युपक्रमः ब्र
ह्मैवेदममृतं पुरस्तादित्युपसंहारः [illegible] वेदमत्यन्त [illegible] इतीयं आ
[illegible] इत्याद्यभ्यासः। न च [illegible] विज्ञान [illegible]
नास्तवनं। नि

[illegible]

श्रवणादीनां लक्षणमाह। श्रवणं नामेत्यादिना। उतिसामान्यादिति न्यायमाश्रित्याशेषवेदांताना
मित्युक्तं। नन्वस्यान्तेपि परस्पराभ्यपलिंगं सर्वत्र ह्रीति न्यायमाश्रित्याद्वितीयवस्तुनीत्युक्तं। लिंगानि
कानीत्यपेक्षायां तानि विभजते। लिंगानि त्विति। उपक्रमोपसंहारावभ्यासांतं लिंगं तत्र द्वयं त्वोदा
हरति। यथा छांदोग्य इति। पुनः पुनरित्यस्य भावः पौनःपुन्यं तत्र च छांदोग्य एव। मानांतराविष
श्रवणं नाम षड्विधलिंगैरशेषवेदांतानामद्वितीयवस्तुनि तात्पर्यावधारणं। लिंगानि तु उपक्रमो
पसंहाराभ्यासापूर्वताफलार्थवादोपपत्त्याख्यानि प्रकरणप्रतिपाद्यस्यार्थस्य तदाद्यंतयोरुपपादन
मुपक्रमोपसंहारौ। यथा छांदोग्ये षष्ठाध्याये प्रकरणप्रतिपाद्यस्याद्वितीयवस्तुन एकमेवाद्वितीयं ब्र
ह्मेत्यादावैतदात्म्यमि [illegible] इत्यंते च प्रतिपादनं। प्रकरणप्रतिपाद्यस्य वस्तुनः तन्मध्ये पौनःपुन्ये
न प्रतिपादनमभ्यासः। यथा तत्रैवाद्वितीयवस्तुनो मध्ये तत्त्वमसीति नवकृत्वः प्रतिपादनं। प्रकरणप्र
तिपाद्यस्याद्वितीयवस्तुनो मानांतरेणाविषयीकरणमपूर्वत्वं यथा तत्रैवाद्वितीयवस्तुनो मानांतरेणाविषयी
करणं। फलं तु प्रकरणप्रतिपाद्यात्मज्ञानस्य तदनुष्ठानस्य वा तत्र तत्र श्रूयमाणं प्रयोजनं यथा तत्राचा
र्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इति अद्वितीयवस्तुज्ञानस्य तत्प्राप्तिः प्र
योजनं। आचार्यवान्पुरुषो वेदेति श्रुतिसिद्धि [illegible] ज्ञानस्य चेतिसगुणादिप्राभिप्रायेणोक्तं आचा
र्यवान्पुरुषो वेदेति ह्यादृष्टे [illegible] पुनः फलं [illegible] तस्य तावदेव चिरमिति फलवचनं [illegible]
मिति द्रष्टव्यं। उदाहरणांतरं [illegible] पाच [illegible] कृते [illegible] निपरत्वमिति [illegible] परस्तादनन्य

कथं तत्र [illegible] [illegible] [illegible] [illegible] प्रसादात् । तदुक्तमभिनीतेति
। अभिन [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] वेत्यादि [illegible]
गगनोपमं [illegible] [illegible] [illegible] [illegible] [illegible] परं नाथ [illegible] अहं [illegible] परस्यादि
श्रुतेः [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] वदोत्यादि श्रुतेः तु [illegible]
रणार्थः अज [illegible] [illegible] [illegible] [illegible] [illegible] विपा [illegible] दित्यादि श्रुतेः एकं सजातीयविजा
त [illegible] [illegible] [illegible] गगनोपमं [illegible] [illegible] मात [illegible] मेकमद्वयं । अलेपकं [illegible]
[illegible] [illegible] [illegible] सततं [illegible] इति निर्विकल्पकस्तु ज्ञातृज्ञानादिविकल्पभेदलयापेक्षया
द्वितीयवस्तुनि [illegible] [illegible] [illegible] [illegible] [illegible] तिरामेकीभावेनावस्थानं । तदाजलाकारा
कारित [illegible] [illegible] [illegible] जलमात्रवद्द्वितीयवस्त्वाकाराकारितचित्तवृत्यन्तर्भासना

द्वितीयवस्तु [illegible] एव भासते ॥

३१ तीयम् [illegible] देवाएकं [illegible] [illegible] कल्पयंतीति श्रुतेः [illegible] [illegible] स्थितित्वं [illegible] [illegible]
[illegible] मिति श्रुतेः अलेपकं निरवद्यं निरंजनमिति श्रुतेः सर्वगतं सर्वानुस्यूतं सन्मात्रं [illegible]
पृथिवी [illegible] [illegible] इत्यादि श्रुतेः यदद्वयं [illegible] [illegible] अशब्दमस्पर्शमरूपमित्यादि श्रुतेः
तदेव [illegible] [illegible] [illegible] श्रुतेः [illegible] [illegible] सर्वदेवविमुक्तो न कदापि [illegible] [illegible]
मुच्यत इति श्रुतेः इति श्लोकार्थः । निर्विकल्पकसमाधिलक्षयति । निर्विकल्पकस्त्वि [illegible] [illegible]
नीय इति भेदः । अति [illegible] [illegible] मेकीभावेनावस्थाने दृष्टांतः । तदाजलेति । दृष्टांतदर्शितमर्थं [illegible] [illegible] [illegible]

ब्रह्मैव भवतीति फलश्रुतिः यथा सुदीप्तात्पावकात् विस्फुलिंगा इत्याद्यर्थवादः कस्मिन्नु भगवो वि-
ज्ञाते सर्वमिदं विज्ञातं भवतीति एकविज्ञानेन सर्वविज्ञानप्रतिज्ञारूपाद्युपपत्तिः एतैर्लिंगैरद्वि-
त्यापि शाखान्तरेषु उपक्रमाद्यूहनीयं। मननं लक्षयति। मननं त्विति। केवलं पुरुषबुद्ध्युत्प्रेक्षि-
तस्तु कुतर्कव्यावर्त्यर्थं वेदान्तानुगुणेति विशेषणं आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना यस्त-
र्केणानुसन्धत्ते स धर्मं वेद नेतर इति स्मृतेः अत्र धर्मशब्दो ब्रह्मणोऽप्युपलक्षणार्थः अनवरतंय-
दं मननमात्रस्य फलद्योतनार्थः। निदिध्यासनलक्षणमाह। विजातीयेति। चित्तस्यैकात्मनानि-
विजातीयदेहादिप्रत्ययरहिताद्वितीयवस्तुनि सजातीयप्रत्ययप्रवाहो निदिध्यासनं। समाधि-
र्द्विविधः सविकल्पो निर्विकल्पश्चेति तत्र सविकल्पो नाम ज्ञातृज्ञानादिविकल्पलयानपेक्षयाऽद्विती-
यवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरवस्थानं। तदा मृन्मयगजादिभानेऽपि मृद्भानवद् द्वै-
तभानेऽप्यद्वैतं वस्तु भासते॥

अलाबप्राप्तं समाधिं विभज्य लक्षयति। समाधिरित्यादिना। सविकल्पकः संप्रज्ञातसमाधिः निर्वि-
कल्पकोऽसंप्रज्ञातसमाधिरिति सांप्रदायिकी संज्ञा द्रष्टव्या तत्रेत्युद्दिष्टसमाधिद्वयमध्ये। ज्ञाता
ज्ञानं ज्ञेयं चेति यो विकल्पो विभागस्तल्लयस्तस्यापेक्षाऽभावस्तदनपेक्षया ज्ञात्रादिविकल्पोल्लेखपू-
र्वकमिति यावत्। अद्वितीयेति। सविकल्पकसमाधिलक्षणमुदाहरणेनोपपादयति। तदा-
मृदिति। यथा मृद्विकारे गजे कुम्भकारादिनिर्मिते गजोऽयमिति स्वाकारबुद्धौ सत्यामपि रूपादिमृन्मात्र-
मेव सत्यं भासते गजाकारस्तु मिथ्या तद्वत् एवं सत्याकारा ब्रह्मणि ज्ञात्राद्याकारे उल्लिख्य-
मानेऽपि ब्रह्मैव सत्यं भासते न ज्ञात्रादिविकल्प इत्यर्थः॥

नं च कामानयानमेव केचित्तु मनसश्चैंद्रियाणां च ऐकाग्र्यं परमं तपः इत्याद्युक्तलक्षणं तपः इत्या
दुः सर्वधातुनां चांद्रायणादि तपः स्वाध्यायः तत्तसमाधिसिद्धये धियोत्पादितद्रव्यमंत्राः स्वाध्यायः प्रणव
जप उपनिषत्पाठादिर्वा ॐ मित्येवं ध्यायथ आत्मानमित्यादौ चाभिमुचप उपनिषद्भावनं येषु
पनिषद्भावनं पदितिस्मृतेः। ईश्वरप्रणिधानं तु समानमेरूपचारे स्मरणं तद्विदेवमात्मबुद्धिप्रकाशं
मुमुक्षुर्वै शरणमहं प्रपद्ये इति मंत्रलिंगात्। आसनादीनि कथयति। करेति। स्वस्तिकादीनीत्यादि
करचरणादिसंस्थानविशेषलक्षणानि पद्मासनकादीन्यासनानि रेचकपूरककुंभकलक्ष
णाः प्राणनिग्रहो पायाः प्राणायामाः इंद्रियाणां विषयेभ्यः प्रत्याहारः स्वचित्तोपवस्तुन्य
तरिंद्रियवृत्तिप्रत्याहारः धारणा तत्रापि तो यवस्तु विक्षिप्यचित्तवृत्ति प्रवाहो
[illegible] . . . गदिस्तु कंतलक्षणाः सविकल्पा अविकल्पा इति समाधिर्यदि दीपकवाय
एसास्वादलक्षणास्तत्र विघ्नाः संभवन्ति॥
पद्मस्वस्तिकादिरासनं रेचकः प्राणवायोः शनैः मनसा बाह्यदेशे प्रसारणं तस्य प्राणस्य अन्याय
नर्वाहिनिःसरणं पूरकस्तस्य तथैवांतः प्रवेशनं कुंभकस्तु पूरितस्य वायोरंतरे निरोध इति भेदः स
माध्ये ध्यानस्य मेदं धोतयितुं विक्षिप्तविक्षिप्त्युक्तं सगमनमन्यत्तु। एवं साग्रसमाधिमनुतिष्ठतो यदा
तिवृत्तस्य नाम्बसितया विप्लवव्याघ्रचोरज्वराद्युपद्रवविघ्नसंभावना भवति तदा तन्निवृत्तिलोकाव
गतसाधनावलंबनेन कापि यदा तु मनस्येव विघ्नाः प्रादुर्भवंति तदा तन्निवारणोपायमुपदेष्टुका

ननु सुषुप्तावपि ज्ञातृज्ञेयज्ञानविभागानामसम्भवात्तत्र निर्विकल्पकसमाधित्वं [illegible] स्यादिति
चेत् स्यादेव तत्स्थितिः तत्र हेतुमाह । उभयत्रेति । सुषुप्तौ बुद्धिरेव नास्ति बुद्धेः कारणे [illegible] लीनत्वात्
न सदसत्त्वात् इति तु बुद्धिर्वृत्तिरहिता वृत्तिमत्त्वाकाराकारितया अवस्थानं गीकारात् सुषुप्तौ
दोषनिरासर्थः । नापि मुक्तावतिव्याप्तिः तत्राविद्यातत्कार्यसंस्काराणामत्यन्तमुच्छेदादिसम्पु
नर्भावस्यानावश्यकस्य दर्शनेन तेषामनुवृत्तेरिष्टत्वात् नापि जीवन्मुक्तौ प्रसङ्गः तस्य ब्युत्थानद
[illegible] [illegible] वृत्तितानुवृत्तिमात्रप्रपञ्चावभासेऽपि स्वरूपावस्थानात् साधकस्य बाधितानु
तत्र [illegible] [illegible] सम्भवति । [illegible] [illegible] तत्साधनसमाधेरङ्गानि आह । यमेत्यादि
मे [illegible] । [illegible] [illegible] प्रत्याहारधारणाध्यानसमाधयः । तत्राहिंसास
त्यास्तेय [illegible] [illegible] यमाः । शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः ॥
वृत्तिमत्त्वाकाराकारितया [illegible] इति [illegible] निर्विकल्पकसमाधिस्वरूपप्रकारकारणमाह । यमे
ति । तत्र यमानाह । तत्रेति । [illegible] नः कायेः परपीडावर्जनमहिंसा [illegible] यथार्थभाषणं [illegible] अदत्तादा
नरूपं परस्वहरणराहित्यमस्तेयं [illegible] [illegible] [illegible] इन्द्रियाणां
[illegible] [illegible] [illegible] [illegible] तिमनोधिताः विपरीतं ब्र
[illegible] [illegible] [illegible] [illegible] [illegible] । निय
मानाह । शौचेति । शौचं [illegible] [illegible] [illegible] चाल्पुल्ला
[illegible] [illegible] [illegible] [illegible] सन्तोषः [illegible] तुष्टिः [illegible] चान्द्रायणादिः तपः कामा

पद्ध

एवंविधसमाध्यंतसाधनानुष्ठानपरिपाकेसति पूर्वोक्तप्रकारेण ब्रह्मात्मैक्यसाक्षात्कारे दृढीभूतेऽविद्यात
त्कार्यात्मकसर्वसंसारनिवृत्तौ जायमानायां काकतालीयन्यायेन यदि प्रारब्धकर्मक्षयात्कालादि
विदुषः शरीरपातस्तदा सद्य एव मुक्तिः स्यात् यदा तु ज्ञानोत्पत्तिसमये प्रारब्धकर्म न क्षीयते तदा
तत्क्षयपर्यंतं शरीरस्यावस्थानात् जीवन्नेव मुक्तः संसारी भवति तस्य लक्षणं वक्तुं प्रतिजानीते। अथे
ति। अथ शब्दः साधननिरूपणानंतर्यार्थः। लक्षणमाह। जीवन्मुक्तो नामेति। ब्रह्मनिष्ठत्वं दे
दांतवेद्यब्रह्मात्मनावस्थितत्वं ब्रह्मनिष्ठो जीवन्मुक्त इत्युक्ते परमार्थतो ब्रह्मनिष्ठत्वमसमुक्त

अथ जीवन्मुक्तलक्षणमुच्यते। जीवन्मुक्तो नाम स्वस्वरूपाखंडब्रह्मज्ञानेन तदज्ञा
नबाधनद्वारा स्वस्वरूपाखंडब्रह्मणि साक्षात्कृतेऽज्ञानतत्कार्यसंचितकर्मसंशय
विपर्ययादीनामपि बाधितत्वादखिलबंधरहितो ब्रह्मनिष्ठो भवति॥४॥

स्याप्यस्तीत्यतो विशिनष्टि। अखिलबंधरहित इति। परममुक्तवैधर्म्यसिद्धये प्रारब्धकर्ममात्रशेष
4) इति विशेषणांतरमध्याहर्तव्यं कथमसौ मुक्त इत्यपेक्षायामाह। अज्ञानतत्कार्येति। अज्ञानं सद
सद्भ्यामनिर्वचनीयमित्याद्युक्तलक्षणं तत्कार्यं स्थूलसूक्ष्मप्रपंचद्वयं संचितं कर्म ज्ञानोत्पत्तेः प्रा
गुत्पन्नमनारब्धफलं संशयो देहाद्यतिरिक्तो ब्रह्मस्वरूप आत्मा भवति न वेति अथवा ब्रह्मात्म
विज्ञानान्मोक्षो भवेन्न वेत्यादि विचिकित्सा विपर्ययो देहादिष्वात्माभिमानादिलक्षणः। आदिशब्दाद्
द्यप्रपंचे सत्यत्वबुद्धिः एतेषां बाधितत्वान्मुक्त इत्यर्थः एतत्कदा स्यादित्यपेक्षायामाह स्वस्वरूपाखं
डब्रह्मणि साक्षात्कृते सतीति साक्षात्कारे

लयादीन्विभज्य लक्षयति। लयस्तावदिति। उक्तलयादिविघ्नचतुष्टयाभावेन चित्तस्य ज्ञेयवस्तुनि यन्नै
श्चल्यं तद्दृष्टान्तेन निर्विकल्पसमाधिलक्षणमित्याह। एतदिति। विघ्ननिवृत्त्युपायं समतिप्रदर्शनेना
ह। तदुक्तमित्यादिना। लये संबोधयेत् उत्तंभयेत् सात्मादं मनः कुर्यादिति यावत्। विक्षिप्तादितं चे
यीवलंबनेन पुनः शमयेत्पुनरद्वितीयवस्तुनिष्ठं कुर्यादेव न तत् सकषायं चित्तं विजानीयात्। कलुषितं
ने लयस्तावदखण्डवस्त्वनवलम्बनेन चित्तवृत्तेर्निद्रा। अखण्डवस्त्वनवलम्बनेन चित्तवृत्तेरन्यावलम्बनं
विक्षेपः। लयविक्षेपाभावेऽपि चित्तवृत्तेः रागादिवासनया स्तब्धीभावादखण्डवस्त्वनवलम्बनं कषायः।
अखण्ड[illegible]वलम्बनेऽपि चित्तवृत्तेः सविकल्प[illegible] रसास्वादः [illegible]
विकल्पकानन्दास्वादनं वा [illegible] विघ्नचतुष्टयरहितं चित्तं निवातदीपवदचलं सदखण्डचैतन्यमात्र
मवतिष्ठते यदा तदा निर्विकल्पकसमाधिरित्युच्यते। तदुक्तं लये संबोधयेच्चित्तं विक्षिप्तं शमये
त्पुनः। सकषायं विजानीयात् शमप्राप्तं न चालयेत्। नास्वादयेद्रसं तत्र निःसङ्गः प्रज्ञया भवेदिति। यथा
दीपो निवातस्थो नेङ्गते सोपमा स्मृतेति॥

सं चित्तमिति विक्षिप्तं च समेऽद्वितीये [illegible] निर्विकल्पके [illegible] शमप्राप्तं [illegible] चालयेत् [illegible] वषयप्रत्यक्
वेकं स्थिरीकुर्यादित्यर्थः। रसं सविकल्पकानन्दं [illegible] तत्र [illegible] आनेन [illegible] [illegible] तद्वि[illegible]
याविवेकबुद्ध्या निःसङ्गः सन् विकल्प[illegible] [illegible] सन्निहित[illegible] निर्विकल्प
कसमाध्यवस्थाने चित्तस्य तदङ्गत्वं [illegible] दृष्टान्तेन दर्शयति। यथादीप इति॥॥

ग्रंथ्नातीति। आरब्धफलानि भुज्यमानानि पूर्वपूर्ववासनया क्रियमाणानि च कर्माणि साक्षितयाकर्तृ-
त्वभोक्तृत्वाभिमानहीनोऽन्यदृष्ट्या पश्यन्निव भासमानोऽपि परमार्थतः स्वदृष्ट्या न पश्यति ज्ञानेन कर्तृ-
त्वाद्यभिमानमूलाज्ञानस्य बाधितत्वाद्वृद्धिलक्षणा वा यस्मिन्नित्यर्थः। बलवत्प्रमुक्तबाणपातवदि-
वत्प्रवृत्तफलस्य कर्मणो यावद्वेगक्षयं निवारकाभावात्तदधीनस्य देहस्य न सद्यः पातप्रसंग इति

अयं तु व्युत्थानसमये मांसशोणितमूत्रपुरीषादिभाजनेन शरीरेणाध्यमैरध्यापटुत्वादिभाजनेनेंद्रियग्रा-
मेणाशनायापिपासाशोकमोहादिभाजनेनांतःकरणेन च पूर्वपूर्ववासनया क्रियमाणानि कर्माणि भुज्यमा-
नानि ज्ञानाऽविरुद्धारब्धफलानि च पश्यन्नपि बाधितत्वात्परमार्थतो न पश्यति। यथेंद्रजालमिति ज्ञान-
वान् तदिदमिंद्रजालं पश्यन्नपि परमार्थमिदमिति न पश्यति। सचक्षुरचक्षुरिव सकर्णोऽकर्ण इव स-
वागवागिव समना अमना इव सप्राणोऽप्राण इव इत्यादिश्रुतेः॥

42

दृष्टांतं। उक्तमर्थं दृष्टांतेन स्पष्टयति। यथेंद्रजालमिति। बाधितत्वात्तु देहेरनुवृत्तेरित्यर्थः। जीवन्मुक्तो देहा-
दिभिर्व्यवहरन्निव दृश्यमानोऽपि न परमार्थतो व्यवहरतीत्यत्र श्रुतिं प्रमाणयति। सचक्षुरचक्षुरिवेति।
चक्षुरादिमानपि प्रपंचरूपाद्यदर्शनाच्चक्षुरादिहीन इव भवतीत्यर्थः। आदिपदात्तदेजति तन्नै-
जति इत्यादिश्रुत्यंतरग्रहः॥

तत्वसाक्षात्कारानंतरं मुक्त एव भवतीत्यत्र प्रमाणमाह । भिद्यत इति । हृदयग्रंथिरहंकारः चिज्जडात्मकत्वाद्ग्रं
थिरिव ग्रंथिः सर्वसंशयाः देहात्मविषया विचिकित्साः अस्यात्मनः कर्माणि जीवन्मुक्तिपक्षे प्रारब्धा
तिरिक्तानि संचितानि क्रियमाणानि च । तथा च न्यायः तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्य
पदेशादिति । परममुक्तिपक्षे प्रारब्धसहितान्यपि क्षीयंते कदा तस्मिन्निष्प्रपंचे ब्रह्मात्मनि दृष्टे सति
साक्षात्कृते सति कथंभूते परावरे सर्वात्मके अत्र सर्वात्मकत्ववचनं तद्व्यतिरिक्तस्याभावपरं चोरः स्थाणु
रितिवद्बाधायां सामानाधिकरण्यस्य विवक्षितत्वात् । यद्वा परो हिरण्यगर्भः सोऽवरो यस्मात्तस्मिन्प

भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे इत्यादिश्रुतेश्च
प रावरे इत्यनेनोक्तत्वर्थः । आदिपदाद्यस्तु सर्वाणि भूतानि यस्मिन्सर्वाणि भूतानीति च मंत्रद्वय
मीशावास्यगतं परिगृह्यते स्मृतेश्चेति चकाराद्युपपत्तिभिश्चेति । यज्ज्ञात्वा न पुनर्मोहमेवं [illegible] ब्रह्मभूतः प्रस
न्नात्मा न शोचति न कांक्षति इत्यादिस्मृतयः समुच्चीयंते । ननु जीवन्मुक्तौ प्रमाणाभावस्तद्यथाहि निर्ल्वयनी
वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेते तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इत्यादिश्रु
तेः । प्रजहाति यदा कामान् प्रकाशं च प्रवृत्तिं च इत्यादिस्मृतेश्च प्रमाणत्वादिति द्रष्टव्यं ॥ ॥ ननु जीवन्मुक्तो
देहेंद्रियादिभिर्व्यवहरति न वा आद्ये तस्य बद्धाद्विलक्षणता [illegible] द्वितीये देहस्यानुपयोगात्सद्यः पातप्रसंग
इत्यत आह ॥

तदुक्तं वृद्धैरिति। सतत्त्वं याथात्म्यं मुमुक्षोरपि नास्ति यश्च सूचे साविदुषो मुक्तस्य कुत एवासौ तदप्युक्तं यो
ऽपि यत्र विरक्तः स्यान्नासौ तस्मिन्प्रवर्तते लोकत्रयाद्विरक्तत्वान्मुमुक्षुः किमितीहते क्षुधया पीड्यमानो
ऽपि न विषं ह्यत्तुमिच्छति मिष्टान्नध्वस्ततृट् ज्ञानवान्मूढः उपलिप्सति रागो लिंगमबोधस्य चित्तव्यायाम
भूमिषु कुतः शाड्वलता तस्य यस्याग्निः कोटरे तरोरित्यादि॥ नन्वविद्याकार्यत्वाद्यथेष्टाचेष्टाया आत्मवि
द्यानिवृत्त्या निवृत्तिवदमानित्वादीनामद्वेष्टृत्वादीनामप्यविद्याकार्यत्वाविशेषान्निवृत्तिरेव स्यान्नानु
तदुक्तं उत्पन्नात्मावबोधस्य ह्यद्वेष्टृत्वादयो गुणाः अयत्नतो भवंत्यस्य न तु साधनरूपिणः इति किंवदु
नायं देहयात्रार्थं भिक्षानिक्षेपरेक्षाप्रापितानि सुखदुःखलक्षणान्यारब्धफलान्यनुभवन्नंत
ःकरणाभासादीनामवभासकः सन् तदवसाने प्रत्यगानंदपरे ब्रह्मणि प्राणेषु लीनेषु सत्यज्ञानतत्का
र्यसंस्काराणामपि विनाशात्परमैकत्वमद्वैतं रसमखिलभेदप्रतिभासरहितमखंडं ब्रह्मा
43 वतिष्ठत इत्याशंक्य कालिदासगवशादनुवृत्त्यभावेऽपि निवृत्तिशास्त्राविरुद्धस्वभावत्वान्न निवर्तेरन्निति दर्शय
ति। किं च कुर्वन्निति। देहयात्रार्थं देहस्थितिः तन्मात्रार्थं न त्विंद्रियप्रीत्यर्थं सुखदुःखलक्षणानि सुखदुःख
साधनानि आरब्धफलानि भोग्यानि अनुभवन्न संगताभ्यां ज्ञानैः कथं भुंजान इत्युच्यते अंतःकरणाभा
सादीनां विषयाकारवृत्तीनां साक्षितयाऽवभासकः साक्षीति यावत् तदवसाने प्रारब्धफलभोगाव
साने जाते अस्य यावाभावात्प्राणेष्व ब्रह्मणि विलीनेषु सति प्रत्यक्सिद्धज्ञानेनैव प्रारब्धकर्मक्षिप्तज्ञानतत्का
र्यतत्संस्काराणामपि विनाशात्संचितकर्मणां ज्ञानेन दाहात् क्रियमाणानामसंश्लेषात्

उक्तं पूर्वाचार्यसंमतिमाह। तदुक्तं सुषुप्तवदिति। जाग्रदवस्थायां द्वयं पश्यन्नपि यः सुषुप्तिगतवद्विशे
षतो न पश्यति स आत्मवित् विषयादर्शने हेतुरद्वयत्वं इति द्वयस्याबाधितत्वादित्यर्थः तथा
कुर्वन्नपि न करोति यतो निःक्रिय इति योजना तथा च [illegible] सुषुप्तवद्यस्य [illegible] इति [illegible] इति
ख्यात इति। ननु सोऽपि जीवन्मुक्त इति कथ्यमन्ये [illegible] इति तत्राह। स्वज्ञानात्म [illegible]। स्वप्नभवास
नानां बाध्यत्वाबाधाया मे वनि [illegible] कुम्भवासनानामेवानन्द [illegible] इत्यर्थः। ननु शास्त्रविहितं
तदुक्तं सुषुप्तवज्जाग्रति [illegible] द्वयं च [illegible] तथा च कुर्वन्नपि निःक्रियस्य
[illegible] निःक्रिय इति [illegible] नानाम्नेव [illegible] विकारादीना
मनुवृत्ति [illegible] नानामेवानुवृत्तिर्भवति [illegible] दासीन्यं वा तदुक्तं [illegible] तस्य तत्त्व
स्य [illegible] चरणं [illegible] तत्स्वरूपं [illegible] आत्म
[illegible] नचेतर इति तदानीमस्मानि [illegible] साधनान्य [illegible] आत्मकारवदनुवर्त
[illegible] साध्यकाङ्क्षादित्यपरि [illegible] औदासीन्यं [illegible] औदासीन्यमुपेक्षा
[illegible] कर्म
[illegible] इति [illegible]
[illegible] इति भावः [illegible]
[illegible] नप्रत्या

पुनर्देहांतरहेत्वभावात्परमकैवल्यमित्यादिनोक्तं ब्रह्मस्वरूपमेवावतिष्ठते। विद्वान्नित्यं॥०॥
निर्गुणब्रह्मसाक्षात्कारवतः प्राणानोत्क्रामंति किंतु प्रत्यग्ब्रह्मण्येव तत्प्राणाः लीनावंति लोप
तद्वत्प्रमाणमस्य। न तस्येति। मुक्तेरमाध्यत्वे का ... प्रमाणयति। विमुक्तश्च विमुच्यतइति
। एवं सति मुक्त एव सन् विद्याप्रत्युपस्थापितनामरूपो ... जीवन्मुक्तिनिबंधनस्य संस्काराभासस्य नित्य
शुद्धबुद्धमुक्तसत्यपरमानंदाद्वयप्रत्यग्ब्रह्मस्वरूपो ... अपरोक्षज्ञानाद्देहपातेऽपि विमुच्यते

न तस्य प्राणा उत्क्रामंत्यत्रैव समवलीयंते ... ब्रह्मैव सन्ब्रह्माप्येतीत्यादिश्रुतेः॥ इति श्रीपरमहंस
परिव्राजकाचार्य ... विरचिते वेदांतसारटीका समाप्ता॥०॥ सं
44 इत्यर्थः। ... नजिह्वौजनीस्थानि ... बालकः
नत्वा ... मुक्त्यै ... रमार्थतत्त्वाद्वा ... निजसुखः शोकमोहादिप
न्नश्चेतः ... भवगहनगतः ... दत्वा हस्तं देव ... दनजत्तानंदपै
र्मैत्र ... प्रबंधप्रबंधस्त्वा ... विद्वज्जनानां किं स्वात्मारामः। वेदांतसारविवृतिं रा
मतीर्थाभिख्यो यतिः चक्रे श्री ... प्रद ... मुदः॥०॥ इति श्रीवेदांतसारटी
का विद्वन्मनोरंजनी समाप्ता॥॥॥

२-४३५. मूं

45

वेदान्तसार का
सटीक विद्वन्मनोरंजनी
टीका